N.A.

Samantrak graha santi prayogaha

समन्त्रक गृह शान्ति प्रयोग:

Sanskrit

Paper - Printed

N.A. (very old)

168 Folio

10.6" X 4.7"

Complete

* अथ *

समन्त्रकग्रहशान्तिप्रयोगः


* प्रारभ्यते *

पूर्व

आत्मनः कुलदेवता १७	लोकमातरः १३	देवसेना ९	मेधा ५
तुष्टिः १६	मातरः १२	जया ८	शची ४
पुष्टिः १५	स्वाहा ११	विजया ७	पद्मा ३
धृष्टिः १४	स्वधा १०	सावित्री	गौरी २ गणेश १

सप्तघृत मातृका

ॐ श्री गणेशाय ॥



कीर्तिर्लक्ष्मीर्धृतिर्मेधा स्वाहा प्रज्ञा सरस्वती॥
माङ्गल्येषु प्रपूज्यंते सप्तैता घृत मातरः ॥
इति वसोर्धारा

पूर्व

हरित बुध	श्वेत शुक्र	श्वेत चन्द्रः
पीत गुरु	रक्त सूर्य	रक्त भौम.
कृष्ण केतु	कृष्णः शनि	कृष्ण राहु.

उत्तर

दक्षिण

पश्चिम


पश्चिम


दक्षिण

कृष्ण राहु	कृष्ण शनि	कृष्ण केतु
रक्त भौम	रक्त सूर्य	पीत गुरू
श्वेत चन्द्र	श्वेत शुक्र	हरित बुध


उत्तर

पूर्व





सर्वतोभद्र चक्रम्



malikar june Shanker chania Swami ملیکارجن ولد شنکر پا سوامی برامن گاوں کر

Baramengoun

अथ

समन्त्रकग्रहशान्तिप्रयोगः

प्रारभ्यते

* श्रीगणेशाय नमः *

* अथ समन्त्रकग्रहशान्तिप्रयोगः *

अथातो ग्रहयज्ञेन व्याख्यास्यामस्तत्र पुण्याहोक्तनक्षत्रे कुर्यादाचम्य प्राणानायम्य संकल्प्य च गणेशपूजनं स्वस्ति-पुण्याहवाचनाविघ्नमण्डपदेवताषोडशमातृकातॄणमातृकाघृततोरणद्वारादिमातृकाः सम्पूज्यायुष्यमन्त्रजपनान्दीश्राद्धाचार्य्यवरणान्तं कृत्वा संकल्पपूर्वकं सर्षपान्विकीर्य पञ्चगव्यप्रोक्षणं कृत्वा अधिदेवताप्रत्यधिदेवतागणपत्यादिलोकपालेन्द्रादिदशदिक्पालयुतान् ग्रहान्सम्पूज्येशान्यां कलशाराधनरुद्रवरुणादिपूजनपूर्वकं ब्रह्मोपवेशनाद्याघारान्तं कुर्यात्॥१॥ द्रव्यं सन्त्यज्य समित्तिलचर्वाज्यद्रव्यः प्रत्येकमष्टोत्तरसहस्रमष्टोत्तरशतमष्टाविंशत्यन्यतमसंख्यया वा हुत्वा नवाहुतिश्च कृत्वा श्रेयः सम्पाद्याचार्य्याय गामन्येभ्यो ऋत्विग्भ्यो दक्षिणान्दत्वाभिषिच्य यजमानं ब्राह्मणान् भोजयित्वा भूयसीश्च

दात्वाशिषोगृहीत्वा कर्मेश्वरार्पणं कुर्यादिति ग्रहशान्तिरेषा एवंविधियत्र क्वचिच्छान्तिः ॥ ० ॥ सान्दीपनिं मुनिश्रेष्ठमवन्तिपुरवासिनम् । रामकृष्णार्चितपदं मालवीयं तपोधनम् ॥ १ ॥ पूर्वाचार्यं जगद्वन्द्यं नत्वा ध्यात्वा मुहुर्मुहुः । मुनीनां मतमालोक्य सम्प्रदायं सतांतथा ॥ २ ॥ ग्रन्थेभ्यः सारमुद्धृत्य विचार्य सदसच्च यत् । वेदवेदाङ्गविदुषा विश्वेशपुरवासिना ॥३॥ कर्मकाराड्युपनाम्ना वै श्रीयागेश्वरशर्म्मणा । बालानां सुखबोधाय निबन्धः क्रियते मया ॥४॥ चन्द्रादिशुभग्रहानुकूलसमये शुभदिने कृतनित्यक्रियो यजमानः शुभासने प्राङ्मुख उपविश्य स्वदक्षिणतः पत्नीं चोपवेश्य । ॐ केशवाय नमः १, ॐ नारायणाय नमः २, ॐ माधवाय नमः ३ इति त्रिराचम्य ॥ ॐ पवित्रेस्थो वैष्णव्यौ सवितुर्वः प्रसवऽउत्पुनाम्यच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः । तस्य ते पवित्रपते पवित्रपूतस्य यत्कामः पुने तच्छकेयम् ॥ ० ॥ इति मन्त्रेण पवित्रधारणं कृत्वा ततः प्राणायामत्रयं कुर्यात । ॐ अपवित्रः पवित्रो वा सर्वावस्थां गतोपि वा ॥ यः स्मरेत् पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः ॥ इत्यात्मानं पूजासामग्रीं च संप्रोक्ष्य

तण्डुलपूरिततााम्रपात्रे मृन्मये वा कंकुमेनाष्टदलं पद्मं कृत्वा तदुपरि गोमयमयीं गौरीं फलमयं गणेशं च संस्थाप्य हस्ते साक्षतपुष्पाणि गृहीत्वा आनोभद्रादीन् मंगलमन्त्रान् पठेत् ॥ ॐ आनोभद्राः क्रतवो यन्तु विश्वतो दब्धासोऽ अपरीतासऽउद्भिदः ! देवानो यथासदमिद्वृधे असन्नप्रायुवो रक्षितारो दिवे दिवे ॥ १ ॥ देवानां भद्रासुमतिर्ऋजूयतान्देवानाठं॰ रातिरभिनो निवर्तताम् । देवानाठं॰ सख्यमुपसे दिमावयन्देवानऽआयुः प्रतिरन्तुजीवसे ॥ २ ॥ तान्पूर्वयानिविदाहूमहेवयं भगम्मित्रमदितिन्दक्षमास्रिधम् । अर्य्यमणं वरुणठं॰ सोममश्विनासरस्वतीनः सुभगामयस्करत् ॥ ३ ॥ तन्नोव्वातोमयोभुव्वातुभेषजं तन्माता पृथिवी तत्पिताद्यौः । तद्ग्रावाणः सोमसुतो मयोभुवस्तदश्विनाशृणुतन्धिष्ण्यायुवम् ॥ ४ ॥ तमीशानं जगतस्तस्थुषस्पतिन्धियं जिन्वमवसे हूमहेव्वयम् । पूषानो यथा वेदसामसद्वृधेरक्षितापायुरदब्धः स्वस्तये ॥ ५ ॥ स्वस्तिनऽइन्द्रोवृद्धश्रवाः स्वस्तिनः पूषाविश्ववेदाः । स्वस्तिनस्तार्क्ष्योऽअरिष्टनेमिः स्वस्तिनो बृहस्पतिर्दधातु ॥ ६ ॥ पृषदश्वा मरुतः पृश्निमातरः शुभंय्यावानोव्विदथेषु जग्मयः ॥ अग्नि-

जिह्वामनवः सूरचक्षसोविश्वेनो देवाऽअवसागमन्निह ॥ ७ ॥ भद्रंकर्णेभिः शृणुयामदेवाभद्रं पश्येमाक्षभिर्यजत्राः । स्थिरैरंगैस्तुष्टुवाꣳसस्तनूभिर्व्यशेमहि देवहितं यदायुः ॥ ८ ॥ शतमिन्नु शरदोऽअन्ति देवा यत्रानश्चक्राजरसंतनूनाम् । पुत्रा सो यत्र पितरो भवन्ति मानो मध्यारीरिषतायुर्गन्तोः ॥ ९ ॥ अदितिर्द्यौरदितिरन्तरिक्षमदितिर्माता सपिता सपुत्रः । विश्वे देवाऽअदितिः पञ्चजनाऽअदितिर्जातमदितिर्जनित्वम् ॥ १० ॥ द्यौः शान्तिरन्तरिक्षꣳशान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिः ॥ वनस्पतयः शान्तिर्विश्वेदेवाः शान्तिः सर्वꣳ शान्तिः शान्तिरेव शान्तिः सामा शान्तिरेधि ॥ ११ ॥ यतोयतः समीहसे ततो नो अभयं कुरु शन्नः कुरु प्रजाभ्यो भयं नः पशुभ्यः ॥ १२ ॥ सुशान्तिर्भवतु ॥ श्रीमन्महागणाधिपतये नमः ॥ लक्ष्मीनारायणाभ्यां नमः ॥ उमामहेश्वराभ्यां नमः ॥ वाणीहिरण्यगर्भाभ्यां नमः ॥ शचीपुरन्दराभ्यां नमः । मातापितृभ्यां नमः ॥ इष्टदेवताभ्यो नमः ॥ कुलदेवताभ्यो नमः ॥ ग्रामदेवताभ्यो नमः ॥ वास्तुदेवताभ्यो नमः । स्थानदेवताभ्यो नमः ॥ सर्वेभ्यो देवेभ्यो नमः ॥ सर्वेभ्यो ब्राह्मणेभ्यो नमः ॥

तण्डुलपूरितताम्रपात्रे मृन्मये वा कंकुमेनाष्टदलं पद्मं कृत्वा तदुपरि गोमयमयीं गौरीं फलमयं गणेशं च संस्थाप्य हस्ते साक्षतपुष्पाणि गृहीत्वा आनोभद्रादीन् मंगलमन्त्रान् पठेत् ॥ ॐ आनोभद्राः क्रतवो यन्तु विश्वतो दब्धासोऽअपरीतासऽउद्भिदः ! देवानो यथासदमिद्वृधे असन्नप्रायुवो रक्षितारो दिवे दिवे ॥ १ ॥ देवानां भद्रासुमतिर्ऋजूयतान्देवानाꣳ रातिरभिनो निवर्त्तताम् । देवानाꣳ सख्यमुपसे दिमावयन्देवानऽआयुः प्रतिरन्तुजीवसे ॥ २ ॥ तान्पूर्वयानिविदाहूमहेवयं भगम्मित्रमदितिन्दक्षमस्रिधम् । अर्य्यमणं वरुणꣳ सोममश्विनासरस्वतीनः सुभगामयस्करत् ॥ ३ ॥ तन्नोव्वातोमयोभुव्वातुभेषजं तन्माता पृथिवी तत्पिताद्यौः । तद्ग्रावाणः सोमसुतो मयोभुवस्तदश्विनाशृणुतन्धिष्ण्यायुवम् ॥ ४ ॥ तमीशानं जगतस्तस्थुषस्पतिन्धियं जिन्वमवसे हूमहेव्वयम् । पूषानो यथा वेदसामसद्वृधेरक्षितापायुरदब्धः स्वस्तये ॥ ५ ॥ स्वस्तिनऽइन्द्रोवृद्धश्रवाः स्वस्तिनः पूषाविश्ववेदाः । स्वस्तिनस्तार्क्ष्योऽअरिष्टनेमिः स्वस्तिनो बृहस्पतिर्दधातु ॥ ६ ॥ पृषदश्वा मरुतः पृश्निमातरः शुभंय्यावानोव्विदथेषु जग्मयः ॥ अग्नि-

जिह्वामनवः सूरचक्षसोविश्वेनो देवाऽअवसागमन्निह ॥ ७ ॥ भद्रंकर्णेभिः शृणुयामदेवाभद्रं पश्येमाक्षभिर्यजत्राः । स्थिरैरंगैस्तुष्टुवांꣳ सस्तनूभिर्व्यशेमहि देवहितं यदायुः ॥ ८ ॥ शतमिन्नु शरदोऽअन्ति देवा यत्रानश्चक्राजरसंतनूनाम् । पुत्रा सो यत्र पितरो भवन्ति मानो मध्यारीरिषतायुर्गन्तोः ॥ ९ ॥ अदितिर्द्यौरदितिरन्तरिक्षमदितिर्माता सपिता सपुत्रः । विश्वे देवाऽअदितिः पञ्चजनाऽअदितिर्जातमदितिर्जनित्वम् ॥ १० ॥ द्यौः शान्तिरन्तरिक्षꣳ शान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिः ॥ वनस्पतयः शान्तिर्विश्वेदेवाः शान्तिः सर्वꣳ शान्तिः शान्तिरेव शान्तिः सामा शान्तिरेधि ॥ ११ ॥ यतोयतः समीहसे ततो नो अभयं कुरु शन्नः कुरु प्रजाभ्यो भयं नः पशुभ्यः ॥ १२ ॥ सुशान्तिर्भवतु ॥ श्रीमन्महागणाधिपतये नमः ॥ लक्ष्मीनारायणाभ्यां नमः ॥ उमामहेश्वराभ्यां नमः ॥ वाणीहिरण्यगर्भाभ्यां नमः ॥ शचीपुरन्दराभ्यां नमः । मातापितृभ्यां नमः ॥ इष्टदेवताभ्यो नमः ॥ कुलदेवताभ्यो नमः ॥ ग्रामदेवताभ्यो नमः ॥ वास्तुदेवताभ्यो नमः । स्थानदेवताभ्यो नमः ॥ सर्वेभ्यो देवेभ्यो नमः ॥ सर्वेभ्यो ब्राह्मणेभ्यो नमः ॥

विश्वेशं माधवं ढुण्ढिं दण्डपाणिं च भैरवं । वन्दे काशीं गुहां गंगां भवानीं मणिकर्णिकां ॥ १ ॥ वक्रतुण्ड-महाकाय कोटिसूर्यसमप्रभ । निर्विघ्नं कुरु मे देव सर्वकार्येषु सर्वदा ॥ २ ॥ सुमुखश्चैकदन्तश्च कपिलो गजकर्णकः । लम्बोदरश्च विकटो विघ्ननाशो विनायकः ॥ ३ ॥ धूम्रकेतुर्गणाध्यक्षो भालचन्द्रो गजाननः । द्वादशैतानि नामानि यः पठेच्छृणुयादपि ॥ ४ ॥ विद्यारम्भे विवाहे च प्रवेशे निर्गमे तथा । संग्रामे संकटे चैव विघ्नस्तस्य न जायते ॥ ५ ॥ शुक्लाम्बरधरं देवं शशिवर्णं चतुर्भुजं । प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशान्तये ॥ ६ ॥ अभीप्सितार्थसिद्ध्यर्थं पूजितो यः सुरासुरैः । सर्वविघ्नहरस्तस्मै गणाधिपतये नमः ॥ ७ ॥ सर्वमंगलमांगल्ये शिवे सर्वार्थसाधिके । शरण्ये त्र्यंबके गौरि नारायणि नमोऽस्तुते ॥ ८ ॥ सर्वदा सर्वकार्येषु नास्ति तेषाममंगलम् । येषां हृदिस्थो भगवान्मंगलायतनं हरिः ॥ ९ ॥ तदेव लग्नं सुदिनं तदेव ताराबलं चन्द्रबलं तदेव । विद्याबलं दैवबलं तदेव लक्ष्मीपते तेंघ्रियुगं स्मरामि ॥१०॥ लाभस्तेषां जयस्तेषां कुतस्तेषां पराजयः । येषामिन्दीवर-

श्यामो हृदयस्थो जनार्दनः ॥ ११ ॥ यत्र योगेश्वरः कृष्णो यत्र पार्थो धनुर्धरः । तत्र श्रीर्विजयो भूतिर्ध्रुवा नीतिर्मतिर्मम ॥ १२ ॥ अनन्याश्चिन्तयन्तो मां ये जनाः पर्युपासते । तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम् ॥ १३ ॥ स्मृते सकलकल्याणं भाजनं यत्र जायते ॥ पुरुषं तमजं नित्यं व्रजामि शरणं हरिम् ॥ १४ ॥ सर्वेष्वारम्भकार्येषु त्रयस्त्रिभुवनेश्वराः । देवाः दिशन्तु नः सिद्धिं ब्रह्मेशानजनार्दनाः ॥१५ ॥ कुशपुष्पयवाक्षतजलद्रव्यं चादाय संकल्पं कुर्यात् ॥ ॐ विष्णुर्विष्णुर्विष्णुः श्रीमद्भगवतो महापुरुषस्य विष्णोराज्ञया प्रवर्तमानस्य अद्य श्री ब्रह्मणो द्वितीये परार्द्धे विष्णुपदे श्रीश्वेतवाराहकल्पे ववस्वतमन्वन्तरे अष्टाविंशतिमे युगे कलियुगे कलिप्रथमचरणे जम्बूद्वीपे भूर्लोके भारतवर्षे भरतखण्डे आर्यावर्तैकदेशे अविमुक्तवाराणसीक्षेत्रे आनन्दवने महास्मशाने गौरीमुखे त्रिकण्टकविराजिते भागीरथ्याः पश्चिमे तीरे विक्रमशके बौद्धावतारे अमुकनामवसंतसरे श्रीसूर्ये अमुकायने अमुकऋतौ महामाङ्गल्यप्रदे मासोत्तमे मासे अमुकमासे अमुकपक्षे अमुकतिथौ अमुकवासरे अमुकनक्षत्रे अमुकयोगे अमुककरणे

रौद्राद्यमुककाले अमुकराशिस्थिते चन्द्रे अमुकराशिस्थिते श्रीसूर्ये अमुकराशिस्थिते देवगुरौ शेषेषु ग्रहेषु यथायथाराशिस्थानस्थितेषु सत्सु एवं ग्रहगुणविशेषणविशिष्टायां शुभपुण्यतिथौ अमुकगोत्रः अमुकशर्माहं मम आत्मनः श्रुतिस्मृतिपुराणोक्तफलप्राप्त्यर्थं कायिकवाचिकमानसिकसांसर्गिकचतुर्विधपातकदुरितक्षयद्वारा धर्मार्थकाममोक्षचतुर्विधलक्ष्मीप्राप्त्यर्थं सर्वग्रहस्वरूपी श्रीपरमेश्वरप्रीत्यर्थं ग्रहशान्तिमहं करिष्ये । तदंगत्वेन स्वस्तिपुण्याहवाचनं मण्डपदेवतास्थापनं पूजनं मातृकापूजनं वसोर्द्धारापूजनं आयुष्यमन्त्रजपं नान्दीश्राद्धं आचार्यादिवरणानि (ग्रहानुकूल्यतासिद्ध्यर्थं ग्रहयज्ञं) च करिष्ये ॥ तत्रादौ निर्विघ्नतासिद्ध्यर्थं गणेशाम्बिकयोः पूजनमहं करिष्ये । इति सङ्कल्पः॥

हस्ते अक्षतान्गृहीत्वा गणपतिमावाहयेत् ॥ तत्र मन्त्रः ॥ हे हेरम्ब त्वमेह्येहि ह्यम्बिकात्र्यंबकात्मज ॥ सिद्धिबुद्धिपते त्र्यक्ष लक्षलाभपितुः पितः ॥ १ ॥ नागास्यो नागहारस्त्वं गणराज चतुर्भुज । भूषितः स्वायुधैर्दन्तपाशांकुपरश्वधैः ॥ २ ॥ आवाहयामि पूजार्थं रक्षार्थं च मम क्रतोः ॥ इहागत्य गृहाण त्वं पूजां यागं च रक्ष मे ॥ ३ ॥

ॐ गणानांत्वागणपतिर्ठ॰ हवामहे प्रियाणान्त्वाप्रियपतिर्ठ॰ हवामहे निधीनांत्वानिधिपतिर्ठ॰ हवामहे वसोमम । आहम जानि गर्भधमात्वम जासिगर्भधम् ॥ १ ॥ ॐ भूर्भुवः स्वः सिद्धिबुद्धिसहिताय गणपतये नमः गणपतिमावाहयामि स्थापयामि ॥ हेमाद्रितनयां देवीं वरदां भैरवप्रियां । लम्बोदरस्य जननीं गौरीमावाहयाम्यहम् ॥१॥ ॐ अम्बेअम्बिकेअम्बालिकेनमानयति कश्चन । ससस्त्यश्वकः सुभद्रिकांकाम्पीलवासिनीम् ॥ १ ॥ ॐ भूर्भुवः स्वः गौर्य्यै नमः गौरीमावाहयामि स्थापयामि ॥ ॐ मनोजूतिर्जुषतामाज्यस्य बृहस्पतिर्यज्ञमिमं तनोत्वरिष्टं यज्ञर्ठ॰ समिमन्दधातु ॥ विश्वेदेवासइहमादयन्तामोंप्रतिष्ठ ॥ १ ॥ अस्यै प्राणा प्रतिष्ठन्तु अस्यै प्राणा क्षरन्तु च । अस्यै देवत्वमर्चायै मामहेतीतिकश्चन॥१॥गणेशाम्बिके सुप्रतिष्ठिते वरदे भवतम् ॥ ॐ गणेशाम्बिकाभ्यां नमः आसनं स० । ॐगणेशाम्बिका॰ एतानि पाद्यार्घ्याचमनीयस्नानीयपुनराचमनीयानि समर्पयामि ॥ ॐ पञ्चनद्यः सरस्वतीमपियन्तिसस्रोतसः ॥ सरस्वतीतु पञ्चधासो देशे भवत्सरित् ॥१॥ पञ्चामृतं मयानीतं पयोदधिघृतं मधुः । शर्करा च समायुक्तं स्नानार्थं प्रतिगृह्यतां

॥ ॐ ग० पंचामृतस्नानं स० ॥ अथवा ॐ पयः+ पृथिव्यांपयऽओषधीषु पयोदिव्यन्तरिक्षेपयोधाः । पयस्वतीः प्रदिशः + सन्तु मह्यम् ॥ ॐ ग० पयस्नानं स० ॥ ॐ दधिक्राब्णोऽअकारिषंजिश्नोरश्वस्यव्वाजिनः । सुरभिनोमुखाकरत्प्रणऽआयूᳬंषि तारिषत् ॥ ॐ ग० दधिस्नानं स० ॥ ॐघृतम्मिमिक्षे घृतमस्य योनिर्घृते श्रितोघृतम्वस्यधाम। अनुष्वधमावहमादयस्वाहाकृतं वृषभव्वक्षिहव्यम् ॥ ॐ ग० घृतस्नानं स० ॥ ॐ मधुव्वाताऋतायतेमधुक्षरन्ति- सिन्धवः । माध्वीर्न्नःसन्त्वोषधीः॥१॥ मधुनक्तमुतोषसो मधुमत्पार्थिवᳬं रजः+ । मधुद्यौरस्तुनः पिता ॥२॥ मधुमान्नोव्वनस्पतिर्मधुमाँ २ऽ अस्तुसूर्यः + । माध्वीर्गावोभवन्तुनः ॥३॥ ॐ ग० मधुस्नानं स० ॥ ॐ अपाᳬं रसमुद्वयसᳬंसूर्य्येसन्तᳬंसमाहितम् । अपाᳬं रसस्ययोरसस्तंव्वोगृह्णाम्युत्तममुपयामगृहीतोसीन्द्रायत्वाजुष्टंगृह्णाम्येषतेयोनिरिन्द्रायत्वाजुष्टतमम् ॥ ॐ ग० शर्करास्नानं स० ॥ ॐआपोहिष्ठामयोभुवस्ता नऊर्ज्जेदधातन । महेरणाय चक्षसे ॥ गंगा च यमुना चैव गोदावरीसरस्वती ॥ नर्मदासिन्धुकावेरीस्नानार्थं प्रतिगृह्यतां ॥ ॐ ग० शुद्धोदकस्नानं स० ॥ ॐ ग०

स्नानान्ते आचमनं स० ॥ ॐ युवासुवासाः परिवीतऽआगात्सउश्रेयान्भवति जायमानः ॥ तन्धीरासः कवयऽउन्नयन्ति-स्वाध्योमनसादेवयन्तः ॥ शीतवातोष्णसन्त्राणं लज्जायारक्षणंपरम् ॥ देहालंकरणंवस्त्रमतः शान्तिं प्रयच्छ मे । ॐ ग० वस्त्रं स० ॥ सुजातो० उपवस्त्रं स० वा ॥ ॐ ग० वस्त्रोपवस्त्रार्थं रक्तसूत्रं समर्पयामि । अलंकरणार्थं अक्षतान् स० ॥ ॐ यज्ञोपवीतं परमं पवित्रं प्रजापतेर्यत्सहजं पुरस्तात् ॥ आयुष्यमग्र्यं प्रतिमुञ्च शुभ्रं यज्ञोपवीतं बलमस्तु तेजः ॥ नवभिस्तन्तुभिर्युक्तं त्रिगुणं देवतामयम् ॥ उपवीतं मया दत्तं गृहाण परमेश्वर ॥ ॐ ग० यज्ञोपवीतं स० ॥ ॐ ग० आचमनं स० ॥ श्रीखण्डचन्दनं दिव्यं गन्धाढ्यं सुमनोहरम् । विलेपनं सुरश्रेष्ठ चन्दनं प्रतिगृह्यताम् ॥ ॐ त्वांगन्धर्वाऽअखनौस्त्वामिन्द्रस्त्वां बृहस्पतिः ॥ त्वामोषधे सोमो राजाविद्वान्यक्ष्मादमुच्यत ॥ ॐ ग० गन्धं स० ॥ अक्षताश्च सुरश्रेष्ठाः कुंकुमाक्ताः सुशोभिताः । मया निवेदिता भक्त्यया गृहाण परमेश्वर ॥ ॐ अक्षन्नमीमदन्त-ह्यवप्रियाऽअधूषत । अस्तोषतस्वभानवोविप्रानविष्ठयामतीयोजान्विन्द्रतेहरी ॥ ॐ ग० अक्षतान्स० ॥ माल्यादीनि

सुगन्धीनि मालत्यादीनि वै प्रभो । मया हृतानि पुष्पाणि पूजार्थं प्रतिगृह्यताम् ॥ १ ॥ ॐ ओषधीः प्रतिमोदध्वं पुष्पवतीः प्रसूवरीः । अश्वाऽइवसजित्वरीर्व्वीरुधः पारयिष्णवः ॥ ॐ ग० पुष्पमालां स० ॥ दुर्वाङ्कुरान्सुहरितानमृता-म्मंगलप्रदान् । आनीतास्तव पूजार्थं गृहाण गणनायक ॥ ॐ काण्डात्काण्डात्प्ररोहंती परुषः परुषस्परि । एवानोदूर्व्वे प्रतनुसहस्रेण शतेन च ॥ ॐग० दूर्वाङ्कुरान्स० ॥ नाना परिमलैर्द्रव्यैर्निर्मितं चूर्णमुत्तमम् । अवीरनामकं चूर्णं गन्धचारुप्रगृह्य-तां ॥ ॐ अहिरिव भोगै पर्येति बाहुं ज्या याहेतिम्परिबाधमानः । हस्तघ्नो व्विश्वाव्वयुनानिव्विद्वान्पुमान्पुमाठं०संपरिपातु व्विश्वतः ॥ ग०नानापरिमलद्रव्याणि स० ॥ वनस्पतिरसोद्भूतोगन्धाढ्योगन्ध उत्तमः । आघ्रेयःसर्व देवानां धूपोयं प्रतिगृह्य-तां ॥ ॐ धूरसिधूर्व्वधूर्व्वन्तं धूर्वतंज्योस्मान्धूर्व्वतितं धूर्व्वयंव्वयंधूर्व्वामः । देवानामसिव्वन्हितमठं० सस्नितमंप-प्रिमञ्जुष्टतमन्देवहूतमम् ॥ ॐ ग० धूपं स० ॥ साज्यं च वर्तिसंयुक्तं वन्हिना योजितं मया । दीपं गृहाण देवेश त्रैलोक्यतिमिरापहं ॥ भक्त्या दीपं प्रयच्छामि देवाय परमात्मने । त्राहि मां निरयाद्घोराद्दीपज्योतिनमोस्तुते ॥

ॐ अग्निर्ज्ज्योतिर्ज्ज्योतिरग्निः स्वाहा सूर्य्यो ज्ज्योतिर्ज्ज्योतिः सू-
र्य्यः स्वाहा॥ अग्निर्व्वर्च्चो ज्ज्योतिर्व्वर्च्चः स्वाहा सूर्य्यो व्वर्च्चो ज्ज्योति-
र्व्वर्च्चः स्वाहा॥ ज्योतिः सूर्य्यः सूर्य्यो ज्ज्योतिः स्वाहा॥ १॥

ॐ ग० दीपं स० ॥ हस्तप्रक्षालनं० ॥ नैवेद्यं गृह्यतां देव भक्तिं मे ह्यचलां कुरु ॥ ईप्सितं मे वरं देहि परत्र च परां गतिम् ॥ शर्कराखण्डखाद्यानि दधिक्षीरघृतानि च ॥ आहारं भक्ष्यभोज्यं च नैवेद्यं प्रतिगृह्यताम् ॥

ॐ नाभ्याऽआसीदन्तरिक्षꣳ शीर्ष्णो द्यौः समवर्त्तत॥ पद्भ्याम्भूमि

र्हिश ६ श्रोत्रात्तथालोका ँ ऽअंकल्पयन् ॥

ॐ प्राणाय स्वाहा० ॐअपानाय स्वा० ॐ समानाय स्वा० ॐ उदानाय स्वा० ॐ व्यानाय स्वा० ॥ ॐ ग० नैवेद्यं स० ॥ ॐ ग० उत्तरापोषनं स० ॥ हस्तप्रक्षालनार्थे जलं स० ॥ मुखप्रक्षालनार्थे जलं स० ॥ आचमनीयं मध्ये पानीयं उत्तरापोषनं च स० ॥ ॐ चन्दनं मलयोद्भूतं कस्तूर्यादिसमन्वितम् ॥ करोद्वर्तनकं देव गृहाण परमेश्वर ॥ ॐ ग० चन्दनेन करोद्वर्तनं स० ॥ॐ पूगीफलं महद्दिव्यं नागवल्लीदलैर्युतम् ॥ एलादिचूर्णसंयुक्तं ताम्बूलं प्रतिगृह्यताम् ॥

ॐयत्पुरुषेणहविषादेवायज्ञमतन्न्वत॥ व्वसन्तोऽस्यासीदाज्ज्यंग्ग्री

ष्म्म ऽइ॒ध्मः॑ शु॒रद्व॑वि ॥ ॥

ॐ ग० मुखवासनार्थे पूगीफलताम्बूलं स० ॥ हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः ॥ अनन्तपुण्यफलदमतः शान्तिं प्रयच्छ मे ।

ॐ हि॒र॒ण्य॒ग॒र्भः सम॑वर्त्त॒ताग्रे॑ भू॒तस्य॑ जा॒तः पति॒रेक॑ऽआसीत् ॥ सदा॑धार पृथि॒वीं द्यामु॒तेमां कस्मै॑ दे॒वाय॑ ह॒विषा॑ विधेम ॥

ॐ ग० कृतायाः पूजायाः साद्गुण्यार्थं दक्षिणां स० ॥ कदलीगर्भसम्भूतं कर्पूरं तु प्रदीपितम् ॥ आरा-र्तिकमहं कुर्वे पश्य मे वरदो भव ॥

ॐ इद ँ हविः प्रजननम्मेऽअस्तुदशवीर ँ सर्व्वगण ँ स्वस्तये।
आत्मसनि प्रजासनि पशुसनि लोकसन्न्यभयसनि । अग्निः
प्रजाम्बहुलाम्मेकरोत्वन्नम्पयोरेतोऽअस्म्मासुधत्त ॥ १ ॥ आरां
त्रिपार्थिव ँ रजः पितुरप्प्रायिधामभिः ॥ दिवः सदा ँ सिबृहतीवि
तिष्ठसऽआत्त्वेषं वर्त्ततेतमः ॥ २ ॥

ॐग० कर्पूरनीराजनंस०॥नानासुगन्धिपुष्पाणि यथाकालोद्भवानि च॥ पुष्पाञ्जलिर्मया दत्तो गृहाण परमेश्वर॥

ॐ यज्ञेनयज्ञमयजन्तदेवास्तानिधर्म्माणिप्रथमान्न्यासन्।।तेहनाकम्महिमानं÷सचन्तयत्रपूर्वेसाद्धयाःसन्तिदेवाः।।ॐ गणानान्त्वा० धम् १ ॐ अम्बेऽअम्बि० नीम् ॥

राजाधिराजाय प्रसह्य साहिने। नमो वयं वैश्रवणाय कुर्महे ॥ समे कामान्कामकामाय मह्यं कामेश्वरो वैश्रवणो ददातु ॥ कुबेराय वैश्रवणाय। महाराजाय नमः ॥

ॐ स्वस्ति । साम्राज्यं भौज्यं स्वाराज्यं वैराज्यं पारमेष्ठ्यं राज्यं महाराज्यमाधिपत्यमयं समन्तपर्यायी स्यात् सार्वभौमस्सार्व्वायुष आन्तादापरार्धात् । पृथिव्यै समुद्रपर्यन्ताया एकराडिति तदप्येष श्लोकोऽभिगीतो मरुतः परिवेष्टारो मरुतस्यावसन् गृहे । आविक्षितस्य कामप्रेर्विश्वेदेवाः सभासद इति ॥

ॐ विश्श्वतश्चक्षुरुतविश्श्वतोमुखोविश्श्वतोबाहुरुतविश्श्वतस्पात् ॥ सम्बाहुब्भ्यान्धमतिसम्पतत्रैर्द्यावाभूमीजनयन्देवऽएकः ॥

ॐ ग० मन्त्रपुष्पाञ्जलिं स० ॥ यानि कानि च पापानि जन्मान्तरकृतानि च ॥ तानि सर्वाणि नश्यन्ति प्रदक्षिणपदे पदे ॥

ॐ येतीर्त्थानिंप्प्रचरन्तिसृकाहस्तानिषुङ्गिणं॥ तेषाᳬ सहस्रयोजनेवधन्न्वांनितन्न्मासि ॥

ॐ ग० प्रदक्षिणां स० ॥ अथ विशेषार्घ्यः ॥ जलगन्धाक्षतफलपुष्पदूर्वादक्षिणाः ताम्रपात्रे प्रक्षिप्य अवनिकृतजानुमण्डलः ॐ रक्ष रक्ष गणाध्यक्ष रक्ष त्रैलोक्यरक्षक ॥ भक्तानामभयं कर्ता त्राता भव भवार्णवात् ॥ १ ॥ द्वैमातुर कृपासिन्धो षाण्मातुराग्रज प्रभो ॥ वरदस्त्वं वरं देहि वाञ्छितं वाञ्छितार्थद ॥२॥ अनेन फलदानेन फलदोऽस्तु सदा मम ॥ ॐ ग० विशेषार्घ्यं स० ॥ अथ प्रार्थना ॥ विघ्नेश्वराय वरदाय सुरप्रियाय लम्बोदराय सकलाय जगद्धिताय ॥ नागाननाय श्रुतियज्ञविभूषिताय गौरीसुताय गणनाथ नमो नमस्ते ॥ १ ॥ भक्तार्तिनाशनपराय गणेश्वराय सर्वेश्वराय शुभदाय सुरेश्वराय ॥ विद्याधराय विकटाय च वामनाय भक्तप्रसन्नवरदाय

नमो नमस्ते ॥२॥ नमस्ते ब्रह्मरूपाय विष्णुरूपाय ते नमः ॥ नमस्ते रुद्ररूपाय करिरूपाय ते नमः ॥ ३ ॥ विश्वरूपस्वरूपाय नमस्ते ब्रह्मचारिणे ॥ भक्तप्रियाय देवाय नमस्तुभ्यं विनायक ॥ ४ ॥ लम्बोदर नमस्तुभ्यं सततं मोदकप्रिय ॥ निर्विघ्नं कुरु मे देव सर्वकार्येषु सर्वदा॥५॥ त्वां विघ्नशत्रुदलनेति च सुन्दरेति भक्तप्रियेति सुखदेति फलप्रदेति ॥ विद्याप्रदेत्यघहरेति च ये स्तुवन्ति तेभ्यो गणेशवरदो भव नित्यमेव ॥ ६ ॥ अनया पूजया गणेशाम्बिके प्रीयेताम्न नमम ॥ इति गणेशपूजनं समाप्तम् ॥

अथ कलशस्थापनम् ॥ कलशलक्षणं च॥ स्वर्णं वा राजतं वापि ताम्रं मृन्मयजं तु वा॥ अकालमव्रणं चैव सर्वलक्षणसंयुतम् ॥ पञ्चाशाङ्गुलवैपुल्यमुत्सेधे षोडशाङ्गुलम् ॥ द्वादशाङ्गुलकं मूलं मुखमष्टाङ्गुलं तथा॥ अथ सप्तमृदः॥अश्वस्थानाद्गजस्थानाद्वल्मीकात्सङ्गमाद्ध्रदात् ॥ राजद्वाराच्च गोष्ठाच्च मृदमानीय निक्षिपेत्॥ अथ सर्वौषधयः ॥ सुरामांसीवचाकुष्ठं शैलेयं रजनीद्वयम् ॥ सटीचम्पकमुस्ता च सर्वौषधिगणाः स्मृतः ॥ अथ पञ्चपल्लवान् ॥ न्यग्रोधोदुम्बराश्वत्थोचूतजम्बू

तथैव चेति ॥ अथ पञ्चरत्नानि ॥ कनकं कुलिशं मुक्ता पद्मरागं च नीलकमिति ॥ प्रकारान्तरम् ॥ वज्रमौक्तिक-वैडूर्य्यं प्रवालं चेन्द्रनीलकम् ॥ अलाभे सर्वरत्नानां हेमं सर्वत्र योजयेदिति ॥ ततः कुंकुमादिना भूमौ अष्टदलं पद्मं कृत्वा ॥ यवपिष्टेन अबीरचूर्णकेनवा ॥

ॐ महीद्यौः पृथिवीचन इमं यज्ञम्मिमिक्षताम् ॥ पिपृतान्नो भरीमभिः ॥

पृथिवि त्वया धृता लोका देवि त्वं विष्णुना धृता ॥ सकलाधारभूतं हि पवित्रं कुरु चासनम् ॥ इति भूमिं स्पृष्ट्वा ॥ १ ॥

ॐ ओषधयः समवदन्तसोमेनसह राज्ञा ॥ यस्मैकृणोतिब्राह्मण

स्त ६ राजन्पारयामसि ॥

यवोसि धान्यराजस्त्वं सर्वोत्पत्तिकरः शुभः ॥ प्राणिनां जीवनोपायः कलशाधः क्षिपाम्यहम् ॥ इति भूमौ धान्यं विकिरेत् ॥ १ ॥

ॐ आजिघ्रकलशम्मह्यात्वाविशन्त्विन्दवः ॥ पुनरूर्ज्जानिवर्त्तस्वसानः सहस्रन्धुक्क्ष्वोरुधारापयस्वतीपुनर्म्माविशताद्रयिः ॥

कला कला हि देवानां दानवानां कलाकलाः ॥ संगृह्य निर्मितो यस्मात्कलशस्तेन उच्यते ॥ इति धान्योपरि कलशं स्थापयेत् ॥ २ ॥

ॐ व्वरुणस्योत्तम्भनमसिव्वरुणस्यस्कम्भसर्ज्जनीस्त्थोव्वरुणस्यऽ
ऋतसदन्न्यासिव्वरुणस्यऽऋतसदनमसिव्वरुणस्यऽऋतसदनमासीद ॥

आपस्त्वमसि देवेश ज्योतिषां पतिरेव च ॥ प्राणिनां जीवनोपायः कलशे पूरयाम्यहम् ॥ इति कलशे जलं पूरयेत् ॥ ३ ॥

ॐ त्वाङ्गन्धर्व्वा० ।

श्रीखण्डं चन्दनं दिव्यं गन्धाढ्यं सुमनोहरम् ॥ विलेपनं सुगन्धाय कलशे संक्षिपाम्यहम् ॥ इति गन्धं क्षिपेत् ॥ ४ ॥

ॐ याऽओषधीः पूर्व्वाजातादेवेब्भ्यस्त्रियुगम्पुरा ॥ मनैनुबब्भ्रूणाम

ह६ शतन्धामानिसुप्तच ।

सर्वौषध्यः सुगन्धाढ्यो दिव्यवृष्टिसमुद्भवाः ॥ कलशाप्यायनकरा औषधीः संक्षिपाम्यहम् ॥ इति सर्वौषधयः॥५॥

ॐकाण्डात्काण्डात्प्र० च॥ दूर्वे अमृतसम्पन्ने शतमूले शताङ्कुरे॥शत मे हर पापानि शतमायुर्विवर्धिनी ॥ इति दूर्वाङ्कुरान्॥६॥

ॐ अश्वत्थेवोनिषदनम्पर्णेवोव्वसतिष्कृता ॥ गोभाजऽइक्तिलासथयत्सनवथ पूरुषम् ॥

यज्ञीयवृक्षसंभूतान्पल्लवान् सरसाङ्कुभान् ॥ अलङ्काराय पञ्चैतान्कलशे संक्षिपाम्यहम् ॥ इति पञ्चपल्लवान्॥७॥

ॐ स्योनापृथिविनोभवान्नृक्षरानिवेशनी ॥ यच्छानु ह शर्म्मस प्प्रथाः ॥ ९ ॥

अश्वस्थानाद्गजस्थानाद्वल्मीकात्संगमाद्ध्रदात् ॥ राजद्वाराद्गोकुलाच्च मृत्स्नां वै कलशे क्षिपेत् ॥ इति सप्तमृदः ॥

ॐ याः फलिनीर्य्या ऽअफला ऽअपुष्षपायाश्च पुष्षिणीः ॥ बृहस्प्पति प्प्रसूतास्तानोमुञ्चन्त्व ह हसः ।

इदं फलं मया सम्यक्संक्षिप्तं कलशे यतः ॥ तेनायं कलशः पूर्णः पूर्णास्सन्तु मनोरथाः । इति पूगीफलम् ॥१॥

ॐ परिवाजंपतिः कविरग्निर्हव्यान्यक्रमीत् ॥ दधद्रत्नानि दाशुषे ॥

रत्नगर्भाऽभद्भूमी रत्नगर्भाब्धिभूधराः ॥ १० ॥ कलशे रत्नगर्भः स्यात्तस्माद्रत्नान्यहं क्षिपे ॥ इति पञ्चरत्नानि ॥

ॐ हिरण्यगर्भः समवर्त्तताग्रे भूतस्य जातः पतिरेकऽआसीत् ॥ सदाधारपृथिवीन्द्यामुतेमाङ्कस्मै देवाय हविषा विधेम ॥ इति हिरण्यम् ॥ ११ ॥

सुजातोज्ज्योतिषासहशर्म्मवरूथमासदत्स्वः ॥ वासोऽअग्ने विश्वरूपः संव्ययस्व विभावसो ॥

शरण्यं सर्वलोकानां लज्जाया रक्षणं परम् ॥ सुवेशधारवस्त्रं हि कलशे वेष्टयाम्यहम् ॥ १२ ॥

ॐ पूर्णादर्व्विपरापतसुपूर्ण्णापुनरापत ॥ व्वस्नेवव्विक्रीणावहाऽइषमूर्ज्जं ६ शतक्रतो ॥

धान्यपूर्णमिदं पात्रं स्थापितं कलशे यतः ॥ तेनायं कलशः पूर्णः पूर्णाः सन्तु मनोरथाः । इति कलशोपरि पूर्णपात्रं न्यसेत् ॥ १३ ॥ याःफलिनी० हसः ॥ मकरस्थं पाशहस्तं स्वर्णसाम्पतिमीश्वरम् ॥ आवाहयेत्प्रतीचीशं वरुणं यादसां पतिम् ॥ एषु चाक्षतपुञ्जेषु पूगीफलसुमूर्तिषु ॥ पूजार्थं सुप्रतिष्ठा वै सुप्रतिष्ठ सुरेश्वर ॥ इत्यस्मिन्कलशे वरुणं साङ्गं सपरिवारं सायुधं सशक्तिकमावाहयामि ॥ अपाम्पतये वरुणाय नमः ॥ इति पञ्चोपचारैर्वरुणं संपूज्य ॥ ततो गङ्गाद्यावाहनम् ॥ कलाकला हि देवानां दानवानां कलाकलाः ॥ संगृह्य निर्मितो येन कलशस्तेन उच्यते ॥ कलशस्य मुखे विष्णुः कण्ठे रुद्रः

समाश्रितः ॥१॥ मूले त्वस्य स्थितो ब्रह्मा मध्ये मातृगणाः स्मृताः ॥२॥ कुक्षौ तु सागराः सप्त सप्तद्वीपा च मेदिनी ॥ अर्जुनी गोमती चैव चन्द्रभागा सरस्वती ॥३॥ कावेरी कृष्णवेणा च गंगा चैव महानदी ॥ तापी गोदावरी चैव माहेन्द्री नर्मदा तथा ॥४॥ नदाश्च विविधा जाता नद्यः सर्वास्तथापराः ॥ पृथिव्यां यानि तीर्थानि कलशस्थानि तानि वै ॥५॥ सर्वे समुद्रास्सरितस्तीर्थानि जलदा नदाः ॥ आयान्तु मम शान्त्यर्थं दुरितक्षयकारकाः ॥६॥ ऋग्वेदोऽथ यजुर्वेदः सामवेदो ह्यथर्वणः । अङ्गैश्च सहिता सर्वे कलशन्तु समाश्रिताः ॥७॥ अत्र गायत्री सावित्री शान्तिः पुष्टिकरी तथा ॥ आयान्तु मम शान्त्यर्थं दुरितक्षयकारकाः ॥८॥ यजमानः स्वहस्ते अक्षतान्गृहीत्वा मनोजूतिजु० तिष्ठ ॥ कलशे वरुणाद्यावाहितदेवताः सुप्रतिष्ठिताः वरदाः भवन्तु । ॐ वरुणाद्यावाहितदेवताभ्यो नमः ॥ विष्णवाद्यावाहितदेवताभ्यो नमः इति वा ॥ आसनार्थे अक्षतान्समर्पयामि ॥ पादयोः पाद्यं स० ॥ हस्तयोः अर्घ्यं स० । आचमनं स० । पञ्चामृतस्नानं स० । शुद्धोदकस्नानं स० । स्नानाङ्गाचमनं स० । वस्त्रं स० । यज्ञोपवीतं स० । उपवस्त्रं स० । आच० स० । गन्धं स० ।

अक्षतान्स० ।पुष्पमालां स० । नानापरिमलद्रव्याणि स०। कृतायाः पूजायाः साद्गुण्यार्थं दक्षिणां स० । आरार्तिक्यं स० । मन्त्रपुष्पाञ्जलिं स० । प्रदक्षिणां स० । नमस्कारं स०। अनया पूजया वरुणाद्यावाहितदेवताः प्रीयन्तान्न मम ॥

अथ प्रार्थना॥देवदानवसंवादे मथ्यमाने महोदधौ॥ उत्पन्नोसि तदा कुम्भ विधृतो विष्णुना स्वयम्॥१॥ त्वत्तो ये सर्वतीर्थानि देवास्सर्वे त्वयि स्थिताः ॥ त्वयि तिष्ठन्ति भूतानि त्वयि प्राणाः प्रतिष्ठिताः॥२॥ शिवः स्वयं त्वमेवासि विष्णुस्त्वं च प्रजापतिः ॥ आदित्या वसवो रुद्रा विश्वेदेवाः सपैतृकाः॥ त्वयि तिष्ठन्ति सर्वेऽपि यतः कामफलप्रदः॥३॥ त्वत्प्रसादादिमं यज्ञं कर्तुमीहे जलोद्भव ॥४॥ सान्निध्यं कुरु मे देव प्रसन्नो भव सर्वदा ॥५॥ नमो नमस्ते स्फटिकप्रभाय सुश्वेतहाराय सुमङ्गलाय ॥ सुपाशहस्ताय झषासनाय जलाधिनाथाय नमो नमस्ते ॥६॥ पाशपाणे नमस्तुभ्यं पद्मिनीजीवनायक ॥ पुण्याहवाचनं यावत्तावत्त्वं सन्निधौ भव ॥ ७ ॥ इति कलशप्रार्थना ॥

अथ पुण्याहवाचनम्॥ अवनीकृतजानुमण्डलः कमलमुकुलसदृशमञ्जलिं शिरस्याधायानन्तरं दक्षिणेन पाणिना

स्वर्णपूर्णकलशं धारयित्वा आशिषः प्रार्थयेत् ॥८॥ दीर्घा नागा नद्यो गिरयस्त्रीणि विष्णुपदानि च ॥ तेनायुःप्रमाणेन पुण्यं पुण्याहं दीर्घमायुरस्तु ॥ विप्राः अस्तु दीर्घमायुः ॥

ॐ त्रीणि पदा विचक्रमे विष्णुर्गोपा अदाभ्यः ॥ अतो धर्माणि धारयन् ॥ १ ॥

विष्णोः पद्भ्यां प्रक्रमेण रक्षा भवति निश्चला ॥ अतस्ताभ्यां रक्षणाभ्यां धर्मान्संधारयेत्पुमान् ॥१॥ मार्कण्डेय-प्रसादेन सप्तकल्पान्तजीविनः ॥ तथा त्वं भव दीर्घायुः पुत्रपौत्रगणैः सह॥२॥ दीर्घायुषश्च सूर्याद्या महानद्यः सपर्वताः॥ विष्णोः पदप्रमाणेन दीर्घमायुरवाप्नुयात॥३॥ पुनः—तेनायुः प्रमाणेन पुण्यं पूण्याहं दीर्घमायुरस्तु इति भवन्तो ब्रु वन्तु

इति यजमानः ॥ २ ॥ पुण्यं पुण्याहं दीर्घमायुरस्तु इति द्विजाः । एवं द्विरपरं शिरसि भूमौ निनयेत् ॥ ब्राह्मणानां हस्ते ॐ शिवा आपः सन्तु जलमिति यजमानः । सन्तु शिवा आप इति ब्राह्मणाः ।

ब्राह्मणाः एवं सर्वत्र ॥ यज० ॥ सौमनस्यमस्तु इति पुष्पम् ॥ विप्राः अस्तु सौमनस्यम् ॥ यज० ॥ अक्षतं चारिष्टं चास्तु ॥ विप्राः अस्त्वक्षतमरिष्टं च ॥ यज० ॥ गन्धाः पान्तु ॥ विप्राः सुमङ्गल्यं चास्तु ॥ यज० ॥ अक्षताः पान्तु ॥ विप्राः आयुष्यमस्तु ॥ यज० ॥ पुष्पाणि पान्तु ॥ विप्राः सौश्रियमस्तु ॥ यज० ॥ सफलताम्बूलानि पान्तु ॥ विप्राः ऐश्वर्यमस्तु ॥ यज० ॥ दक्षिणाः पान्तु ॥ विप्राः बहुदेयं चास्तु ॥ यज० ॥ दीर्घमायुः शान्तिः पुष्टिस्तुष्टिः श्रीर्यशो विद्या विनयो वित्तं बहुपुत्रं बहुधनं चायुष्यं चास्तु ॥ विप्राः तथास्तु ॥ यं कृत्वा सर्ववेदयज्ञक्रियाकरणकर्मारम्भाः शुभाः शोभनाः प्रवर्तन्ते तमहमोङ्कारमादिं कृत्वा ऋग्यजुःसामाथर्वाशीर्वचनं बहुऋषिमतं समनुज्ञातं भवद्भिरनुज्ञातं पुण्यं पुण्याहं वाचयिष्ये ॥ विप्राः वाच्यताम् ॥

ॐ द्रविणोदा ॥ पिपीषतिजुहोतप्प्रचतिष्ठत॥नेष्ट्राहतुभिरिष्यत॥ १॥
सविताक्त्वांसवानाᳫंसुवतामग्निर्ग्गृहपतीनाᳫंसोमोव्वनस्प्पतीनाम्॥
बृहस्प्पतिर्व्वाचऽइन्द्रोज्ज्यैष्ठ्यायरुद्र ॥ पशुब्भ्योमित्र ॥ सत्त्योव्वरुणो
धर्म्मपतीनाम्॥२॥नक्षत्रंक्षां ᳫं सिनपिशाचास्तंरन्तिदेवानामोजं॥
प्प्रथमजᳫंह्येतत्॥योबिभर्त्ति दाक्षायणᳫंहिरण्ण्यᳫंसदेवेषु कृणुतेदीर्ग्घ

मायु ६ समनुष्ष्येषुकृणुतेदीर्ग्घमायु ÷ ॥३॥ उच्चातेजातमन्धसो दिविसद्भूम्म्यादंदे ॥ उग्र ६ शर्म्ममहिश्श्रवं ÷॥४॥ उपास्म्मैगाय तानर ६ पवमानायेन्दवे ॥ अभिदेवाँ २ ऽइयक्षते ॥ ५ ॥

ॐ इत्येताचार्यः पूरयाहे ब्रूयात् ॥ व्रतजपनियमतपःस्वाध्यायक्रतुशमदमदयादानविशिष्टानां सर्वेषां ब्राह्मणानां मनः समाधीयताम् इति यज० ॥ समाहितमनसः स्मः इति ब्रा० ॥ प्रसीदन्तु भवन्तः इति य० ॥ प्रसन्ना स्मः इति ब्रा० ॥ ततो यजमानो ब्रूयात ॥ शान्तिरस्त्वित्यादि । अस्त्विति द्विजाः प्रतिवचनं सर्वत्र दद्युः ॥ ॐ शान्तिरस्तु ॥ १ ॥ ॐ पुष्टिरस्तु ॥ २ ॥ ॐ तुष्टिरस्तु ॥ ३ ॥ ॐ वृद्धिरस्तु ॥ ४ ॥ अविघ्नमस्तु ॥ ५ ॥

ॐ आयुष्यमस्तु ॥ ६ ॥ ॐ आरोग्यमस्तु ॥ ७ ॥ ॐ शिवमस्तु ॥ ८ ॥ ॐ शिवङ्कर्मास्तु ॥ ९ ॥ ॐ कर्मस-मृद्धिरस्तु ॥ १३ ॥ ॐ धनधान्यसमृद्धिरस्तु ॥ १४ ॥ ॐ पुत्रपौत्रसमृद्धिरस्तु ॥ १५ ॥ ॐ इष्टसम्पदस्तु ॥ १६ ॥ बहिः— ॐ अरिष्टनिरसनमस्तु ॥ १७ ॥ ॐ यत्पापं रोगं अशुभं अकल्याणं तद्दूरे प्रतिहतमस्तु ॥ १८ ॥ अन्तः— ॐ यच्छ्रेयस्तदस्तु ॥ ११ ॥ ॐ उत्तरे कर्मणि निर्विघ्नमस्तु ॥ २० ॥ ॐ उत्तरोत्तरमहरहरभिवृद्धिरस्तु ॥ २१ ॥ ॐ उत्तरोत्तराः क्रियाः शुभः शोभनाः सम्पद्यन्ताम् ॥ २२ ॥ ॐ तिथिकरणमुहूर्तनक्षत्रग्रहलग्नसम्पदस्तु ॥ २३ ॥ ॐ तिथिकरणमुहूर्त्तनक्षत्रग्रहलग्नाधिदेवताः प्रीयन्ताम् ॥ ॐ तिथिकरणे समुहूर्ते सनक्षत्रे सग्रहे सलग्ने साधिदैवते प्रीयेताम् ॥ ॐ दुर्गापाञ्चाल्यौ प्रीयेताम् ॥ ॐ अग्निपुरोगा विश्वेदेवाः प्रीयन्ताम् ॥ ॐ इन्द्रपुरोगाः मरुद्गणाः प्रीयन्ताम् ॥ वसिष्ठपुरोगाः ऋषिगणाः प्रीयन्ताम् ॥ ॐ माहेश्वरीपुरोगाः उमामातरः प्रीयन्ताम् ॥ ॐ अरुन्धतीपुरोगा एकपत्न्यः प्रीयन्ताम् ॥ ॐ विष्णुपुरोगाः सर्वे देवाः प्रीयन्ताम् ॥ ॐ ब्रह्मपुरोगाः सर्वे वेदाः प्रीयन्ताम् ॥ ॐ ब्रह्म च ब्राह्मणाश्च प्रीयन्ताम् ॥ ॐ श्रीसर-

स्वत्यौ प्रीयेताम् ॥ ॐ श्रद्धामेधे प्रीयेताम् ॥ ॐ भगवती कात्यायनी प्रीयताम् ॥ ॐ भगवती माहेश्वरी प्रीयताम् ॥ ॐ भगवती ऋद्धिकरी प्रीयताम् ॥ ॐ भगवती वृद्धिकरी प्रीयताम् ॥ ॐ भगवती पुष्टिकरी प्रीयताम् ॥ ॐ भगवती तुष्टिकरी प्रीयताम् । ॐ भगवन्तौ विघ्नविनायकौ प्रीयेताम् ॥ ॐ सर्वाः कुलदेवताः प्रीयन्ताम् ॥ ॐ सर्वाः ग्रामदेवताः प्रीयन्ताम् ॥ ॐ सर्वाः इष्टदेवताः प्रीयन्ताम् ॥ बहिः— ॐ हताश्च ब्रह्मद्विषः ॐ हताश्च परिपन्थिनः ॐ हताश्च विघ्नकर्तारः शत्रवः पराभवं यान्तु ॥ ॐ शाम्यन्तु घोराणि ॐ शाम्यन्त्वीतयः ॐ शाम्यन्त्युपद्रवाः ॥ अन्तः—ॐ शुभानि वर्धन्ताम् ॥ ॐ शिवा आपः सन्तु ॥ ॐ शिवा ऋतवः सन्तु ॥ ॐ शिवा ओषधयः सन्तु ॥ ॐ शिवा वनस्पतयः सन्तु ॥ ॐ शिवा अतिथयः सन्तु ॥ ॐ शिवा अग्नयः सन्तु ॥ ॐ शिवा आहुतयः सन्तु ॥ ॐ अहोरात्रे शिवे स्याताम् ॥ २४ ॥

ॐ निकामेनिकामेन ᳘ पर्जन्न्योंव्वर्षतुफलवत्योन्ऽ ओषधयः᳘ पच्यन्तां योगक्क्षेमोनं᳘ कल्पताम् ॥ १ ॥

ॐ शुक्राङ्गारकबुधबृहस्पतिशनैश्चरराहुकेतुसोमसहित आदित्यपुरोगाः सर्वे ग्रहाः प्रीयन्ताम् ॥ ॐ भगवान्नारायणः प्रीयताम् ॥ ॐ भगवान्पर्जन्यः प्रीयताम् ॥ ॐ भगवान्स्वामी महासेनः प्रीयताम् ॥ पुरोनुवाक्यया यत्पुयं तदस्तु ॥ याज्यया यत्पुरायं तदस्तु ॥ वषट्कारेण यत्पुरायं तदस्तु ॥ प्रातः सूर्योदये यत्पुरायं तदस्तु ॥ एतत्कल्याणयुक्तं पुरायं पुरायाहं वाचयिष्ये इति य० ॥ ॐ वाच्यतामिति ब्राह्मणाः ॥ ॐ ब्राह्मचं पुरायमहर्य्यच्च सृष्ट्युत्पादनकारकम् ॥ वेदवृक्षोद्भवन्नित्यं तत्पुरायाहं ब्रुवन्तु नः ॥ भो ब्राह्मणाः मया क्रियमाणस्य अमुकाख्यस्य कर्मणः पुरायाहं भवन्तो ब्रुवन्तु

इति यज० ॥ ॐ पुण्याहं ब्रा० एवं वचनं प्रतिवचनं च त्रिः पठित्वा तथाहि ॥ अस्य कर्मणः पुण्याहं भवन्तो ब्रुवन्तु ॥

ॐ पुनन्तु मा देवजना ᳪ पुनन्तु मनसा धियः ॥ पुनन्तु विश्वा भूतानि जातवेदः पुनीहि मा ॥ १ ॥

पृथिव्यामुद्धृतायां तु यत्कल्याणं पुरा कृतम् । ऋषिभिः सिद्धगन्धर्वैस्तत्कल्याणं ब्रुवन्तु नः ॥ २ ॥ भो ब्राह्मणाः मया क्रियमाणस्य अमुकाख्यस्य कर्मणः कल्याणं भवन्तो ब्रुवन्तु ॥ ॐ कल्याणम् ॥ ३ ॥

ॐ यथेमां वाचं कल्याणीमावदानि जनेभ्यः ॥ ब्रह्मराजन्याभ्याᳪ शूद्राय चार्याय च स्वाय चारणाय च ॥ प्रियो देवानां दक्षिणायै दा

तुरिहभूयासमयम्मेकामः समृद्ध्यतामुपंमादोनं मतु ॥ २ ॥

सागरस्य तु या ऋद्धिर्महालक्ष्म्यादिभिः कृता ॥ सम्पूर्णाः स्युः प्रभावा च तां ऋद्धिं प्रब्रुवन्तु नः ॥३॥ भो ब्राह्म० अस्य कर्मणः ऋद्धिं भवन्तो ब्रुवन्तु ॥ ॐ कर्म ऋध्यताम् ॥ ३ ॥

ॐसत्रस्यऽऋद्धिरस्यगंन्मज्ज्योतिं रमृताऽअभूम ॥ दिवंम्पृथिव्या ऽअद्ध्यारुहामाविदामदेवान्त्स्वर्ज्ज्योतिः ॥ ३ ॥

स्वस्तिस्तु या विनाशाख्या पुण्यकल्याणवृद्धिदा ॥ विनायकप्रियां नित्यं तां च स्वस्तिं ब्रुवन्तु नः ॥ भो ब्राह्मणाः अस्मै कर्मणे स्वस्तिं भवन्तो ब्रुवन्तु ॥ ॐ आयुष्मते स्वस्ति ॥

ॐ स्वस्तिनऽइन्द्रोवृद्धश्रवाः स्वस्तिनः पूषाविश्ववेदाः ॥
स्वस्तिनस्तार्क्ष्योऽअरिष्टनेमिः स्वस्तिनोबृहस्पतिर्दधातु ॥ ४ ॥

समुद्रमथनाज्ज्ञाता जगदानन्दकारिका ॥ हरिप्रिया च माङ्गल्या तां श्रियं च ब्रुवन्तु नः ॥ भो ब्राह्म० अस्य कर्मणः श्रीरस्त्विति भवन्तो ब्रुवन्तु ॥ ॐ अस्तु श्रीः ।

ॐ श्रीश्चतेलक्ष्मीश्चपत्न्यावहोरात्रे पार्श्वेनक्षत्राणिरूपमश्विनौ व्यात्तम् ॥ इष्णन्निषाणामुम्मंऽइषाण सर्वलोकम्मंऽइषाण ॥५॥

मृकण्डसूनोरायुर्यद्ध्रुवलोमशयोस्तथा । आयुषा तेन संयुक्ता जीवेम शरदः शतम्॥६॥जीवन्तु भवन्तः इति ब्रा०॥

ॐ शतमिन्नुशरदोऽअन्तिदेवायत्रांनश्चक्राजरसंन्तनूनाम् ॥पुत्रा सोयत्रपितरोभवन्तिमानोमद्ध्यारीरिषतायुर्गन्तोः ॥ ६ ॥

शिवगौरीविवाहे या या श्रीरामे नृपात्मजे ॥ धनदस्य गृहे या श्रीरस्माकं सास्तु सद्मनि ॥ ॐ अस्तु श्रीः ॥

ॐ मनसः कामुमाकूतिंव्वाचः सत्यमंशीय ॥ पशूना ७ं रूप मन्नस्यरसोयशः श्रीः श्रयताम्मयिस्वाहा ॥७॥

प्रजापतिर्लोकपालो धाता ब्रह्मा च देवराट् ॥ भगवाञ्छाश्वतो नित्यं नो वै रक्षन्तु सर्वतः ॥८॥ ॐ भगवान्प्रजापतिः प्रीयताम् ॥

ॐ प्रजापते न त्वदेतान्यन्यो विश्वा रूपाणि परिता बभूव ॥ यत्कामास्ते जुहुमस्तन्नोऽअस्तु वयं स्याम पतयो रयीणाम् स्वाहा ॥८॥

आयुष्मते स्वस्तिमते यजमानाय दाशुषे ॥ श्रिये दत्ताशिषः सन्तु ऋत्विग्भिर्वेदपारगैः ॥ ॐ आयुष्मते स्वस्ति ॥

ॐ प्रतिपन्थामपद्महि स्वस्तिगामनेहसम् ॥ येन विश्वाः परिद्वि

षौव्रृणाक्तिंविन्दतेवसु ॥

ॐ स्वस्तिवाचनसमृद्धिरस्तु ॥ कृतस्य स्वस्तिवाचनकर्मणः समृद्ध्यर्थं स्वस्तिवाचकेभ्यो ब्राह्मणेभ्यः इमां दक्षिणां विभज्य दातुमहमुत्सृजे ॥

अथाभिषेकः ॥ अभिषेके पत्नी वामतः एकस्मिन्पात्रे वरुणोदकं गृहीत्वाऽविधुराश्चत्वारो ब्राह्मणा दूर्वाग्रपल्लवैः सकुटुम्बं यजमानमभिषिञ्चेयुः ॥ तन्मन्त्राः—

ॐ पयं ÷ पृथिव्यां० ॥ १ ॥ ॐ पञ्चनद्यः ॥२॥ ॐ वरुण स्यो० ॥ ३ ॥ ॐ पुनन्तुमा० ॥४॥ ॐ देवस्यंत्वासावितुः प्रस

र्व्वोरश्विनोर्ब्बाहुभ्याम्पूष्णोहस्ताभ्याम् ॥ सरस्वत्यैव्वाचोयन्तुर्य्यन्त्रिये
दधामिबृहस्पतेष्ट्वासाम्म्राज्ज्येनाभिषिञ्चाम्यसौ ॥ ५ ॥ देवस्य
त्वा० ॥ सरस्वत्यैव्वाचोयन्तुर्य्यन्त्रेणाग्नेःसाम्म्राज्ज्येनाभिषिञ्चामि
॥६॥ देवस्यत्वा० ॥ अश्विनोर्भैषज्ज्येनतेजसेब्ब्रह्मवर्च्चसायाभि
षिञ्चामिसरस्वत्यैभैषज्ज्येनव्वीर्य्यायान्नाद्यायाभिषिञ्चामीन्द्रस्ये
न्द्रियेणबलाय श्रियैयशसेऽभिषिञ्चामि ॥ ७ ॥ ॐविश्वानि

देवसवितर्दुरितानिपरासुव ॥ यद्भद्रन्तन्नऽआसुव ॥ ८॥ धामच्छ दग्निरिन्द्रोब्ब्रह्मदेवोबृहस्प्पतिः ॥सचेतसोविश्श्वैदेवायज्ञम्प्रावन्तु नश्शुभे ॥९॥ त्वंय्यविष्ठदाशुषोनॄँ ॥ पाहिशृणुधीगिरः॥ रक्षातोक मुतत्क्मना ॥ १० ॥ अन्नपतेन्नस्यनोदेह्यनमीवस्यशुष्मिणः । प्रप्र दातारन्तारिषऽऊर्ज्जन्नोधेहिद्विपदेचतुष्पदे॥ ११॥ द्यौः शान्ति रन्त० ॥१२॥ यतोयत स० ॥१३॥ अमृताभिषेकोऽस्तु ॥इति पुण्याहवाचनप्रयोगः॥

अविघ्नो मण्डपश्चैव मातॄणां पूजनं सकृत्।वैश्वदेवं वसोर्द्धारां नान्दीश्राद्धमतः परम्॥ विवाहोपनयनचूडाकरणसीमन्तोन्नयनादौ-मोदश्चैव प्रमोदश्च सुमुखो दुर्मुखस्तथा॥अविघ्नो विघ्नहर्त्ता च षडेते विघ्ननायकाः॥ ॐ मोदाय नमः मोदं आ०॥१॥ॐ प्रमोदाय० प्रमोदं आ०॥५॥विघ्नहर्त्रे० विघ्नहर्त्तारं आ०॥६॥ ॐ मोदादिषड्विनायकेभ्यो नमः इति पूजयेत्॥ इति अविघ्नपूजनम्॥

अथ मण्डपदेवता प्रतिष्ठा॥ततो मण्डपार्थं स्तम्भारोपणम्। तद्यथा—

ॐ देवस्यत्वास० भ्याम्। इति अभ्रिमादत्ते॥ १ ॥

ॐ इदमहꣳ रक्षसाङ्ग्रीवाऽअपिकृन्तामि। इत्यवटं परिलिखति॥ २ ॥

ॐ मावोंरिषत्खनितायस्मैंचाहङ्खनामिव ॥ द्विपाच्चतुष्पादस्माकं सर्वमस्त्वनातुरम् । इति खनति ॥ ३ ॥

ॐ सिञ्चान्ति परिषिञ्चन्त्युत्सिञ्चन्तिपुनन्तिच ॥ सुरायै बभ्र्वैमदेकि न्त्वोव्वदतिकित्वः ॥ इति तस्मिन्नवटे अपः आसिञ्चति ॥ ४ ॥

ॐ सवोंसि सवयास्मद्वेषो सवयारातीः ॥ इति यवानावपति ॥ ५ ॥ दर्भसिद्धार्थकां स्तूष्णीमावपति ॥

ॐ काण्डात्काण्डा० शतेन च । इति दूर्वाङ्कुरन् ॥ ६ ॥

ॐ दधिक्राव्णो० करत् । इति दधिः ॥७॥

ॐ याः फलिनी० हसः । इति फलम् ॥ ८ ॥

ॐ हिरण्यगर्भः विधेम । इति हिरण्यं चावपति ॥९॥

ॐ उच्छ्रयस्व वनस्पतऽ ऊर्ध्वो मा पाह्य६ हंसऽ आस्य यज्ञस्यो दृचः । इति मन्त्रेण रक्तसूत्रबद्धमदनफलसमन्वितस्तम्भोत्थापनम् ॥ १० ॥

ॐ ऊर्द्ध्वऽऊषुणऽऊतये तिष्ठा देवोनसविता ॥ ऊर्द्ध्वोवाजस्य सनितायदञ्जिभिर्वाघद्भिर्विह्वयामहे ॥ इत्यवटे रोपणम् ॥

ॐ स्थिरो भववीड्वङ्गऽआशुभववाज्यर्वन् ॥ पृथुर्भवसुषदस्त्व मग्ने ३ पुरीषवाहनः ६ ॥

इति समन्ततो मृत्पूर्णेन स्थिरकरणम् ॥ तस्मिन्स्तम्भे ॥ ॐ नलिन्यै नमः ॥ १ ॥ ॐ नन्दिन्यै० ॥ २ ॥ ॐ मैत्रायै० ॥ ३ ॥ ॐ उमायै० ॥ ४ ॥ ॐ पशुवर्द्धिन्यै० ॥ ५ ॥

ॐ मनोजू० प्रतिष्ठ ॥

मण्डपदेवताः सुप्रतिष्ठिताः वरदाः भवन्तु इति प्रतिष्ठाप्य ॥ ॐ मण्डपदेवताभ्यो नमः इति षोडशोपचारैरभ्यर्चनम् ॥ मण्डपदेवताप्रीत्यर्थं यथाशक्ति ब्राह्मणान्भोजयिष्ये ॥ अत्र शिष्टाचार एव शरणम् ॥ मण्डपप्रतिष्ठा तु सीमन्तोन्नयनान्नप्राशनचूडाकरणोपनयनवेदारम्भकेशान्तव्रतविसर्गविवाहेषु कार्या॥ तत्रैव मण्डपसत्वात्,मण्डपस्तम्भनिवेशनन्तु॥ वृषाद्राशित्रये स्थिते सूर्ये सति आग्नेयां कार्यम् ॥ सिंहाद्राशित्रये ईशान्याम् ॥ वृश्चिकाद्राशित्रये वायव्याम्॥ कुम्भाद्राशित्रये नैर्ऋत्याम् ॥ इति मण्डपदेवताप्रतिष्ठा ॥

अथ मातृकापूजनम् । अथाग्नेयां प्रतिमास्वक्षतपुञ्जेषु वा प्राक् संस्थमुदक्संस्थं वा मातृस्थापनम् ॥

अथ ध्यानम्—गौरी पद्मा शची मेधा सावित्री विजया जया । देवसेना स्वधा स्वाहा मातरो लोकमातरः ॥१॥

धृतिः पुष्टिस्तथा तुष्टिरात्मनः कुलदेवता । गणेशेनाधिका ह्येताः वरदाभयपाणयः ॥२॥ इति ध्यात्वा नाममन्त्रेण पूजनम्—

ॐ भूर्भुवः स्वः गणपतये नमः गणपतिं आवाहयामि स्थापयामि ॥ १ ॥ ॐ भूर्भुवः स्वः गौर्यै न० गौरीमा० ॥ २ ॥ ॐ पद्मायै ० पद्मां० ॥ ३ ॥ ॐ शच्यै० शचीं ॥ ४ ॥ ॐ मेधायै० मेधां ॥ ५ ॥ ॐ सावित्र्यै ० सावित्रीं ॥ ६ ॥ ॐ विजयायै० ॐ विजयां० ॥ ७ ॥ ॐ जयायै० जयां० ॥ ८ ॥ ॐ देवसेनायै० देवसेनां ० ॥ ९ ॥ ॐ स्वधायै ० स्वधां ० ॥ १० ॥ ॐ स्वाहायै० स्वाहां० ॥ ११ ॥ ॐ मातृभ्यो० मातृः ॥ १२ ॥ ॐ लोकमातृभ्यो० लोकमातृः ० ॥ १३ ॥ धृत्यै० ॥ धृतिमा० ॥१४ ॥ ॐ पुष्ट्यै० पुष्टिमा० ॥ १५ ॥ ॐ तुष्ट्यै० तुष्टिमा० ॥ १६ ॥ ॐ आत्मनः कुलदेवतायै० आत्मनः कुलदेवता ० ॥ १७ ॥ ॐ मनोजू० प्रतिष्ठ । गौर्याद्याः कुलदेवतान्ताः मातरो गणपतिसहिताः सुप्रतिष्ठिताः वरदाः

भवन्तु ॥ ॐ गणपत्यादि कुलदेवतान्तमातृभ्यो नमः इत्यभ्यर्चनम् ॥

अथ पुष्पाञ्जलिः—गौरी पद्मा शची मेधा सावित्री विजया जया । देवसेना स्वधा स्वाहा मातरो लोकमातरः ॥ १ ॥ धृष्टिः पुष्टिस्तथा तुष्टिरात्मनः कुलदेवता । गणेशेनाधिका ह्येता वृद्धौ पूज्याश्च षोडश ॥ २ ॥ हरात्मज चतुर्बाहो वारणास्य महोदर । प्रसन्नो भव मह्यं त्वं गौरीपुत्र नमोऽस्तु ते ॥ ३ ॥ ब्रह्माणी कमलेन्दुसौम्यवदना माहेश्वरी लीलया, कौमारी रिपुदर्प्पनाशनकरी चक्रायुधा वैष्णवी । वाराही घनघोरघर्घरमुखी चैन्द्री च वज्रायुधा, चामुण्डा गणनाथरुद्रसहिता रक्षन्तु नो मातरः ॥ ४ ॥

अथ मातृकापूजने वैदिकक्रमः । अथाग्नेय्यां प्रतिमास्वक्षतपुञ्जेषु वा प्राक्संस्थमुदक्संस्थं वा मातृस्थापनम् ॥

तद्यथा—

ॐ गणनान्त्वा गणपति ᳪ हवामहे । प्रियाणान्त्वा प्रियपति ᳪ हवा

महे । निधीनान्त्वा निधिपतिँ ᳡ हवामहे व्वसोमम ॥ आहमजानि गर्ब्भधमात्त्वमजासि गर्ब्भधम् ॥ १ ॥

ॐ भूर्भुवः स्वः गणपतये नमः गणपतिमावाहयामि स्थापयामि ॥ १ ॥

ॐ शर्म्मास्यवधूत ᳡ रक्षोवधूताऽ अरातयोदित्त्यास्त्वगसिप्प्रति त्वादितिर्व्वेत्तु ॥ अद्रिरसिव्वानस्प्पत्यो ग्ग्रावासिपृथुबुध्नः᳡ प्प्रति त्वादित्यास्त्वग्ग्वेत्तु ॥ २ ॥

ॐ भूर्भुवः स्वः गौर्यै नमः गौरीमावाहयामि स्थापयामि ॥ २ ॥

ॐ पावकानः सरस्वतीव्वाजेभिर्व्वाजिनीवती ॥ यज्ञम्वष्टुधियावसुः ॥

ॐ पद्मायै ० पद्मामा० ॥ ३ ॥

ॐ निवेशनः सङ्गमनोवसूनांविश्श्वारूपाभिचष्टेशचीभिः ॥ देव

ऽइवसवितासत्यधर्म्मेन्द्रोनतस्थौसमरेपथीनाम् ॥ ॐ शच्यै० शचीमा ० ॥४॥

ॐ मेधाम्मेव्वरुणोददातुमेधामग्निः प्प्रजापतिः ॥ मेधामिन्द्र

श्च्चायुश्श्च मेधान्धातादंदातुमेस्वाहा ॥ ॐ मेधायै ० मेधामा० ॥ ५ ॥

ॐ सविताच्वा सवानां ॐ सुवतामग्निर्गृहपतीना ॐ सोमोव्वन स्पतीनाम् ॥ बृहस्पतिर्ग्वाचऽइन्द्रोज्ज्यैष्ठ्यायरुद्र ऽपशुब्भ्योमित्र ऽ सत्योव्वरुणोधर्मपतीनाम् ॥ ६ ॥ ॐ सावित्र्यै० सावित्रीमा० ॥ ६ ॥

ॐ विज्ज्यन्धनु ÷ कपर्दिनोविशल्योवाणवाँ २ ऽउत ॥ अनेशन्

न्नस्ययाऽइषवऽआभुरस्यनिषङ्गधि ॥७॥ ॐ विजयायै ० विजया ० ॥ ७ ॥

ॐ बह्वीनाम्पिताबहुरस्य पुत्राश्चिश्चाकृणोतिसमनावगत्य ॥

इषुधिः सङ्काः पृतनाश्चसर्वाः पृष्ठेनिनद्धोजयतिप्रसूतः ॥ ८ ॥

ॐ जयायै ० जयामा ० ॥ ८ ॥

ॐ इन्द्रऽआसान्नेताबृहस्पतिर्दक्षिणायज्ञः पुरऽएतुसोमः ॥

देवसेनानामभिभञ्जतीनाञ्जयन्तीनाम्मरुतोयन्त्वग्रम् ॥ ९ ॥

ॐ देवसेनायै० देवसेनामा० ॥ ९ ॥

ॐ पितृभ्यः स्वधायिभ्यः स्वधानमः पितामहेभ्यः स्वधायिभ्यः स्वधानमः प्रपितामहेभ्यः स्वधायिभ्यः स्वधानमः ॥ अक्षन्पितरोमीमदन्तपितरोतीतृपन्तापितरः पितरः शुन्धध्वम् ॥ १० ॥

ॐ स्वधायै० स्वधामा० ॥ १० ॥

ॐ स्वाहा प्प्राणेब्भ्य ᳪ साधिपतिकेब्भ्य ᳪ॥ पृथिव्व्यै स्वाहाग्ग्नये स्वाहा न्तरिक्षाय स्वाहा व्वायवे स्वाहा ॥ दिवे स्वाहा सूर्य्याय स्वाहा ॥११॥

ॐ स्वाहायै० स्वाहामा० ॥ ११ ॥

ॐ अनाधृष्टापुरस्तादग्ग्नेराधिपत्यऽ आयुर्म्मेदा ᳪ पुत्रवतीदक्षिणतऽ इन्द्रस्याधिपत्ये प्प्रजाम्मेदा ᳪ ॥ सुषदापश्श्चाद्देवस्य सवितुराधिपत्ये चक्षुर्म्मेदाऽ आश्रुतिरुत्तरतोधातुराधिपत्येरायस्प्पोषम्मेदा ᳪ ॥

न्विधृतिरुपरिष्टाद्बृहस्पतेराधिपत्यऽओजोमेदाव्विश्श्वाब्भ्यो मानाष्ट्
ट्राब्भ्यस्प्पाहिमनोरश्श्वासि ॥ १२ ॥

ॐ मातृभ्यो० मातृः० ॥ १२ ॥

ॐ रयिश्श्चमेरायश्श्चमेपुष्टञ्चमे पुष्टिश्श्चमेव्विभुचमेप्प्रभुचमेपूर्णञ्च
मेपूर्णतरञ्चमेकुयवञ्चमेक्षितञ्चमेन्नञ्चमेक्षुच्चमेयज्ञेनकल्पन्ताम् १३

ॐ लोकमातृभ्यो० लोकमातृः० ॥ १३ ॥

ॐ भुद्रङ्कर्णेभिः शृणुयामदेवा भुद्रम्पश्येमाक्षभिर्य्यजत्राः॥ स्थिरैरङ्गैस्तुष्टुवा ᳪ संस्तुनूभिर्व्यशेमहिदेवहितंयदायुः ॥ ॐ घृत्यै० घृतिमा० ॥ १४ ॥

ॐ अङ्गान्न्यात्मान्भिषजातदुश्विनात्मानमङ्गैः समंधात्सरस्वती॥ इन्द्रस्यरूपᳪ शतमानमायुश्चन्द्रेणज्ज्योतिरमृतन्दधानाः॥ १५॥

ॐ पुष्टयै० पुष्टिमा० ॥ १५ ॥

ॐ जातवेदसे सुनवाम सोममरातीयतो निदहातिवेदः ॥ सनः

पुर्षदतिदुर्ग्गाणिव्विश्श्वानावेवसिन्धुन्दुरितात्यग्निः॥ ॐ तुष्ट्यै०तुष्टिमा०॥१६॥

ॐ व्वसोः पवित्रमसिशतधारंव्वसोः पवित्रमसिसहस्रंधारम॥ देव स्त्वासवितापुनातुव्वसोः पवित्रेणशतधारेणसुप्प्वाकामधुक्षः॥१७॥

ॐ आत्मनः कुलदेवतायै० आत्मनः कुलदेवताम्॥ १७॥

ॐ मनो० छ० ।गौर्याद्याः कुलदेवतान्ता मातरो गणपतिसहिताः सुप्रतिष्ठिता वरदा भवन्तु ॥ ॐ गणपत्यादि कुलदेवतान्तमातृभ्यो नमः इत्यभ्यर्चनम्॥

चूडाकरणोपनयनविवाहेषु यथाकुलाचारं मातृभाण्डस्थापनम्॥

॥ अथ वसोर्द्धारापूजनम्॥

वसो॑ ६ पवित्रमसि शतधारं वसो॑ ६ पवित्रमसि सहस्रधारम् ॥
देवस्त्वा सविता पुनातु वसो॑ ६ पवित्रेण शतधारेण सुप्वा ॥ १ ॥

आज्यं यतोऽस्ति देवानामशनं मङ्गलात्मकम् । ततो मातॄः समुद्दिश्य घृतधारां ददाम्यहम् ॥ २ ॥ कुड्यस्तम्भसुसंलग्ना मातॄणामुपरि स्थिताः । कारयेत् पञ्च तिस्रो वा सप्त वोदङ्मुखस्थिताः ॥ ३ ॥ इति मन्त्रैः तिस्रः, पञ्च, सप्त, वा, धाराः, पातयित्वा ।

ॐ कामधुक्ष ६ ॥ इत्येतावता मन्त्रेणार्धभागे गुडेनैकीकरणम् । प्रतिधारामेकैकदेवतामावाहयेत् ॥

ॐ मनस ६ काम ० ॥ ॐ श्रियै नमः श्रियमा० ॥ १ ॥

ॐ श्रीश्चते लक्ष्मीश्च ० ॥ ॐ लक्ष्म्यै न० लक्ष्मीमा० ॥२॥

ॐ भद्रङ्कर्णेभि ६ ० ॥ ॐ धृत्यै० धृतिमा० ॥३॥

ॐ मेधाम्मेवरुणो० ॥ ॐ मेधायै० मेधामा० ॥ ४ ॥

ॐ प्राणाय स्वाहा० ॥ ॐ स्वाहायै० स्वाहा० ॥ ५ ॥

ॐ आयङ्गौ ९ ॥ प्रज्ञायै० प्रज्ञा० ॥ ६ ॥

ॐ पावकानः सरस्वती वाजेभिर्व्वाजिनीवती॥ यज्ञंवष्टुधियावसुः॥

ॐ सरस्वत्यै० सरस्वतीमा० ॥७॥ॐ श्रीर्लक्ष्मीर्धृतिर्मेधा स्वाहा प्रज्ञा सरस्वती ॥ माङ्गल्येषु प्रपूज्यन्ते सप्तैता घृतमातरः ॥१॥ ॐवसोर्धारादेवताभ्यो नमः इति वा आवाह्य ॥ ॐमनो० प्रतिष्ठ० ॥ वसोर्द्धारादेवताः सुप्रतिष्ठिता वरदा भवन्तु इति सम्पूज्य प्रार्थयेत ॥ यदङ्गत्वेन भो देव्यः पूजिता विधिमार्गतः ॥ कुर्वन्तु कार्यमखिलं निर्विघ्नेन क्रतूद्भवम् ॥२॥ अनया पूजया वसोर्द्धारादेवताः प्रीयन्तान्नमम ॥ इति वसोर्द्धाराकरणम् ॥

॥ अथायुष्यमन्त्रजपः ॥

ॐ आयुष्यंवर्च्चस्य ६ रायस्पोषमौद्भिदम् । इद ६ हिरंण्यंवर्च्चस्वज्जैत्राया विशतादुमाम ॥ १ ॥ न तद्रक्षा ८ं सि० युः ॥ २ ॥ यदाबध्नन्दाक्षायणाहिरंण्य ६ शतानीकायसुमनस्यमाना ६ ॥

तन्न्मऽआबध्नामिशतशारदायायुष्माञ्जरदृष्टिर्यथासम्॥ इत्यायुष्यमन्त्रजपः॥

अथ साङ्कल्पेन विधिना नान्दीश्राद्धप्रयोगः। सव्येनं सर्वं कार्यम्॥ ऋजव एव कुशास्तिलार्थे यवा दातव्याः॥ ॐ सत्यवसुसंज्ञकाः विश्वेदेवाः नान्दीमुखाः भूर्भुवः स्वः इदं वः पाद्यं पादावनेजनं पादप्रक्षालन वृद्धिः॥ १॥ ॐ अमुकगोत्राः मातृपितामहीप्रपितामह्यः नान्दीमुख्यः भूर्भुवः स्वः इदं वः पाद्यं पादावनेजन पादप्रक्षालनं वृद्धिः॥ २॥ ॐ अमुकगोत्राः पितृपितामहप्रपितामहाः नान्दीमुखाः भूर्भुवः स्वः इदं वः पाद्यं पादावनेजन पादप्रक्षालनं वृद्धिः॥ ३॥ ॐ अमुकगोत्राः मातामहप्रमाता-महवृद्धप्रमातामहाः सपत्नीकाः नान्दीमुखाः भूर्भुवः स्वः इदं वः पाद्यं पादावनेजनं पादप्रक्षालनं वृद्धिः॥ ४॥ आसनदानम्— ॐ सत्यवसुसंज्ञकाः विश्वेदेवाः नान्दीमुखाः भूर्भुवः स्वः इमे आसने वो नमो

नमः ॥ १ ॥ ॐ अमुकगोत्राः मातृपितामहीप्रपितामह्यः नान्दीमुख्यः भूर्भुवः स्वः इमे आसने वो नमोनमः ॥२॥
ॐ अमुकगोत्राः पितृपितामहप्रपितामहाः नान्दीमुखाः भूर्भुवः स्वः इमे आसने वो नमो नमः ॥३ ॥ ॐ अमुक-
गोत्राः मातामहप्रमातामहवृद्धप्रमातामहाः सपत्नीकाः नान्दीमुखाः भूर्भुवः स्वः इमे आसने वो नमो नमः ॥ ४ ॥
ततो गन्धादिदानं विश्वेदेवादि ॥ गन्धपुष्पधूपदीपताम्बूलपूगीफलयज्ञोपवीतानि दद्यात् ॥ ॐ सत्यवसुसंज्ञकाः
विश्वेदेवाः नान्दीमुखाः भूर्भुवः स्वः इदं गन्धाद्यर्चनं स्वाहा सम्पद्यतां वृद्धिः ॥ १ ॥ ॐ अमुकगोत्राः मातृ-
पितामहीप्रपितामह्यः नान्दीमुख्यः भूर्भुवः स्वः इदं गन्धाद्यर्चनं स्वाहा सम्पद्यतां वृद्धिः ॥ २ ॥ ॐ अमुकगोत्राः
पितृपितामहप्रपितामहाः नान्दीमुखाः भूर्भुवः स्वः इदं गन्धाद्यर्चनं स्वाहा सम्पद्यतां वृद्धिः ॥ ३ ॥ ॐ अमुक
गोत्राः मातामहप्रमातामहवृद्धप्रमातामहाः सपत्नीकाः नान्दीमुखाः भूर्भुवः स्वः इदं गन्धाद्यर्चनं स्वाहा सम्पद्यतां
वृद्धिः ॥ ४ ॥ भोजननिष्क्रयसङ्कल्पः— ॐ सत्यवसुसंज्ञकाः विश्वेदेवाः नान्दीमुखाः भूर्भुवः स्वः इदं युग्मब्राह्मण-

भोजनपर्याप्तामान्ननिष्क्रयभूतं द्रव्यममृतरूपेण स्वाहा सम्पद्यतां वृद्धिः ॥ १ ॥ ॐ अमुकगोत्राः मातृपितामही-प्रपितामह्यः नान्दीमुख्यः भूर्भुवः स्वः इदं युग्मब्राह्मणभोजनपर्याप्तामान्ननिष्क्रयभूतं द्रव्यममृतरूपेण स्वाहा सम्पद्यतां वृद्धिः ॥ २ ॥ ॐ अमुकगोत्राः पितृपितामहप्रपितामहाः नान्दीमुखाः भूर्भुवः स्वः इदं युग्मब्राह्मणभोजन-पर्याप्तामान्ननिष्क्रभूतं द्रव्यममृतरूपेण स्वाहा सम्पद्यतां वृद्धिः ॥ ३ ॥ ॐ अमुकगोत्राः मातामहप्रमातामहवृद्ध-प्रमातामहाः सपत्नीकाः नान्दीमुखाः भूर्भुवः स्वः इदं युग्मब्राह्मणभोजनपर्याप्तामान्ननिष्क्रयभूतं द्रव्यममृतरूपेण स्वाहा सम्पद्यतां वृद्धिः ॥ ४ ॥ सक्षीरयवमुदकदानम्— ॐ सत्यवसुसंज्ञकाः विश्वेदेवा नान्दीमुखाः प्रीयन्ताम् ॥१॥ ॐ गोत्राः मातृपितामहीप्रपितामह्यः नान्दीमुख्यः प्रीयन्ताम् ॥२॥ ॐ गोत्राः पितृपितामहप्रपितामहाः नान्दीमुखाः प्रीयन्ताम् ॥ ३ ॥ ॐ द्वितीयगोत्राः मातामहप्रमातामहवृद्धप्रमातामहाः सपत्नीकाः नान्दीमुखाः प्रीयन्ताम् ॥ ४ ॥ शिवा आपः सन्तु ॥ सौमनस्यमस्तु ॥ अक्षतं चारिष्टञ्चास्तु ॥ अघोराः पितरः सन्तु ॥ इति

पूर्वाग्रां जलधारां दद्यात् ॥ ततः कृताञ्जलिः प्रार्थयेत् । ॐ गोत्रन्नो वर्धतां दातारो नोऽभिवर्धन्तां वेदाः सन्ततिरेव च ॥ श्रद्धा च नो मा व्यगमद्बहुदेयं च नोऽस्तु । अन्नं च नो बहु भवेदतिथींश्च लभेमहि ॥ याचितारश्च नः सन्तु मा च याचिष्म कञ्चन ॥ एताः सत्या आशिषः सन्तु ॥ ब्रा० सन्त्वेताः सत्या आशिष इति ॥ दक्षिणासङ्कल्पः— ॐ सत्यवसुसंज्ञकाः विश्वेदेवाः नान्दीमुखाः भूर्भुवः स्वः कृतस्य नान्दीश्राद्धस्य फलप्रतिष्ठासिध्यर्थं द्राक्षामलकयवमूलनिष्क्रयिणीं दक्षिणां दातुमहमुत्सृजे ॥ १ ॥ ॐ अमुकगोत्राः मातृपितामहीप्रपितामह्यः नान्दीमुख्यः भूर्भुवः स्वः कृतस्य नान्दीश्राद्धस्य फलप्रतिष्ठासिद्ध्यर्थं द्राक्षामलकयवमूलनिष्क्रयिणीं दक्षिणां दातुमहमुत्सृजे ॥२॥ ॐ गोत्राः पितृपितामहप्रपितामहाः नान्दीमुखाः भूर्भुवः स्वः कृतस्य नान्दीश्राद्धस्य फलप्रतिष्ठासिद्ध्यर्थं द्राक्षामलकयवमूलनिष्क्रयिणीं दक्षिणां दातुमहमुत्सृजे ॥३॥ ॐ गोत्राः मातामहप्रमातामहवृद्धप्रमातामहाः सपत्नीकाः नान्दीमुखाः भूर्भुवः स्वः कृतस्य नान्दीश्राद्धस्य फलप्रतिष्ठासिद्ध्यर्थं द्राक्षामलकयवमूलनिष्क्रयिणीं दक्षिणां दातुमहमुत्सृजे ॥ ४ ॥

ॐ उपास्म्मैगायतानर ६ पवंमानायेन्दवे ॥ अभिदेवाँ२ऽइयक्षते ॥१॥ इडांमग्ग्नेपुरुद ६ स ६ सनिङ्गो ः शश्वत्तम ६ हवंमानाय साध ॥ स्यान्नं ÷ सूनुस्तनंयोव्विजावाग्ग्नेसातेंसुमतिर्ब्भूत्त्वस्मे ॥२॥

यज० अनेन नान्दीश्राद्धं सम्पन्नम्। ब्रा० सुसम्पन्नम् । तेन श्राद्धकर्माङ्गदेवताः प्रीयन्तां वृद्धिः॥ विश्वेदेवाः प्रीयन्ताम्॥

ॐ वाजेवाजेवतव्वाजिनोनोधनेषुविप्राऽअमृताऽऋतज्ञाः ६ ॥ अस्य मध्वं ÷ पिबतमादयंध्वं तृप्तायातपथिभिर्द्देवयानैः ६ ॥ ३ ॥ इति विसृज्य ॥

ॐ आमा॒वाजस्य प्प्रस॒वोजगम्म्यादेमेद्यावापृथि॒वीवि॒श्वरूपे ॥ आमागन्ताम्पि॒तरामा॒तरा॒चामा सोमोऽअमृ॒तत्वेनगम्म्यात् ॥ ४ ॥

विश्वेदेवाः प्रीयन्तामिति विसर्जनम् ॥ इति नान्दीश्राद्धप्रयोगः ॥

अथाचार्यादिवरणम् ॥ उदङ्मुखमाचार्यमुपवेश्य गन्धादिभिः संपूज्य ॥ ॐ अमुकगोत्रोत्पन्नः अमुकप्रवरान्वितः अमुकशर्मा यजमानोऽहं अमुकगोत्रोत्पन्नममुकप्रवरान्वितं शुक्लयजुर्वेदान्तर्गतवाजसनेयमाध्यन्दिनीयशाखाध्यायिनममुकशर्माणं ब्राह्मणमस्मिन्ग्रहशान्त्याख्ये कर्मणि एभिर्वरणद्रव्यैः आचार्यत्वेन त्वामहं वृणे ॥ वृतोऽस्मि इति प्रतिवचनम् ॥ आचार्यस्तु यथा स्वर्गे शक्रादीनां बृहस्पतिः ॥ तथा त्वं मम यज्ञेऽस्मिन्नाचार्यो भव सुव्रत ॥ १ ॥ अस्मिन् ग्रहशान्त्याख्ये कर्मणि एभिर्वरणद्रव्यैः अमुकगोत्रममुकशर्माणं ब्राह्मणं ब्रह्मत्वेन त्वामहं वृणे ॥ वृतोऽस्मि ॥

यथा चतुर्मुखो ब्रह्मा सर्वलोकपितामहः ॥ तथा त्वं मम यज्ञेऽस्मिन् ब्रह्मा भव द्विजोत्तम ॥ २ ॥ अस्मिन्० सदस्यत्वेन त्वामहं वृणे ॥ वृतोऽस्मि ॥ भगवन्सर्वधर्मज्ञ सर्वधर्मभृतांवर ॥ वितते मम यज्ञेऽस्मिन्सदस्यो भव सुव्रत ॥ ३ ॥ अस्मिन्० गणपत्यत्वेन त्वामहं वृणे ॥ वृतोऽस्मि ॥ वाञ्छितार्थफलावाप्त्यै पूजितोऽसि सुरासुरैः ॥ निर्विघ्नं क्रतुसंसिध्यै त्वामहं गणपं वृणे ॥ ४ ॥ अस्मिन्० उपद्रष्टृत्वेन त्वामहं वृणे । वृतोऽस्मि ॥ भगवन्सर्वधर्मज्ञ सर्वधर्मपरायण ॥ वितते मम यज्ञेऽस्मिन्नुपद्रष्टा भव द्विज ॥ ५ ॥ अस्मिन्० ऋत्विक्त्वेन त्वामहं वृणे । वृतोऽस्मि ॥ भगवन्सर्वधर्मज्ञ सर्वधर्मपरायण । वितते मम यज्ञेऽस्मिन्नृत्विक्त्वं मे मखे भव ॥ ६ ॥

ॐ व्रतेनदीक्षामाप्नोति दीक्षयाप्नोतिदक्षिणाम् ॥ दक्षिणाश्श्रद्धामाप्नोतिश्श्रद्धयासत्त्यमाप्प्यते ॥ १ ॥

अथ करसम्पुटं कृत्वा सर्वान् प्रार्थयेत् ॥ अस्मिन्कर्मणि ये ये तु वृता गुरुमुखादयः ॥ सावधानाः प्रकुर्वन्तु स्वं स्वं कर्म यथोदितम् ॥ १ ॥ अस्य यागस्य निष्पत्त्यै भवन्तोऽभ्यर्थिता मया ॥ सुप्रसन्नैः प्रकर्तव्यं कर्मेदं विधिपूर्वकम् ॥ २ ॥ यथा विहितं कर्म कुरु । यथाज्ञानं करवाणि ॥ इति आचार्यादिवरणम् ॥

आचार्यः आचम्य प्राणानायम्य देशकालौ संकीर्त्य अस्मिन् ग्रहशान्त्याख्ये कर्मणि यजमानेन वृतोऽहं आचार्यकर्म करिष्ये । आचार्यो वामहस्ते गौरसर्षपान् गृहीत्वा दिग्रक्षणं कुर्यात् । तत्र मन्त्राः—

रक्षोहणं ब्वलगहनं वैष्णवीमिदमहन्तंवलगमुत्किरामियम्मेनि
ष्ट्योयममात्योनिचखानेदमहन्तंब्वलगमुत्किरामियम्मेसमानोयम
संमानोनिचखानेदमहन्तंब्वलगमुत्किरामियम्मेसबन्धुर्यमसबन्धुर्नि

चुखानेदमहन्तंवलगमुत्किरामि यम्मेंसजातोयमसंजातोनिचुखानो
त्कृत्याङ्किरामि ॥ १ ॥ रक्षोहणों वोवलगहनु ६ प्रोक्षांमिवैष्णवा
न्रंक्षोहणोंवोवलगहनोवंनयामिवैष्णवान्रंक्षोहणोवो वलगहनो
वंस्तृणामिवैष्णवान्रंक्षोहणौवांवलगहनाऽउपंदधामिवैष्णवीरक्षो
हणौवां वलगहनौपर्य्यूहामिवैष्णवीवैष्णवमांसिवैष्णवास्थ ॥२॥

रक्षसाम्भागोसि निरस्त ६ रक्षऽइदमह ६ रक्षोभितिष्ठामीदमह ६ रक्षोवबाधऽइदमह ६ रक्षोधमन्तमोनयामि ॥ घृतेनद्यावापृथिवी प्प्रोर्णुवाथांव्वायोव्वेस्तोकानामग्गिनराज्ज्यस्यव्वेतु स्वाहा स्वाहाकृतेऽ ऊर्द्ध्वनभसम्मारुतङ्गच्छतम् ॥ ३ ॥ रक्षोहाव्विश्श्वचर्षणिरभियोनिमयोहते ॥ द्रोणेसधस्थमा संदत् ॥ ४ ॥

गणाधिपं नमस्कृत्य नमस्कृत्य पितामहम् । विष्णुं रुद्रं श्रियं देवीं वन्दे भक्त्या सरस्वतीम् ॥ १ ॥ स्थानक्षेत्रं नमस्कृत्य दिननाथं निशाकरम् । धरणीगर्भसम्भूतं शशिपुत्रं बृहस्पतिम् ॥ २ ॥ दैत्याचार्यं नमस्कृत्य सूर्यपुत्रं महाग्रहम् । राहुं केतुं नमस्कृत्य यज्ञारम्भे विशेषतः ॥ ३ ॥ शक्राद्या देवताः सर्वाः नमस्कृत्य मुनींस्तथा । गर्गं मुनिं नमस्कृत्य नारदं मुनिसत्तमम् ॥ ४ ॥ वसिष्ठं मुनिशार्दूलं विश्वामित्रं महामुनिम् । व्यासं कविं नमस्कृत्य सर्वशास्त्रविशारदम् ॥ ५ ॥ विद्याधिका ये मुनयः आचार्य्याश्च तपोधनाः । सर्वे ते मम यज्ञस्य रक्षां कुर्वन्तु विघ्नतः ॥ ६ ॥ प्राचीं रक्षतु गोविन्द आग्नेयां गरुडध्वजः । याम्यां रक्षतु वाराहो नारसिंहस्तु नैर्ऋतीम् ॥ ७ ॥ केशवो वारुणीं रक्षेद्वायवीं मधुसूदनः । उदीचीं श्रीधरो रक्षेदैशानीं तु गदाधरः ॥ ८ ॥ ऊर्ध्वं गोवर्धनधरो ह्यधस्ताद्धरणीसुतः । एवं दश दिशो रक्षेद्वासुदेवो जनार्दनः ॥ ९ ॥ यज्ञाग्रे रक्षताच्छङ्खः पृष्ठे पद्मं तथोत्तमम् । वामपार्श्वे गदा रक्षेद्दक्षिणे तु सुदर्शनः ॥ १० ॥ उपेन्द्रः पातु ब्रह्माणमाचार्य्यं पातु वामनः । अच्युतः पातु

ऋग्वेदं यजुर्वेदमधोऽत्तजः ॥ ११ ॥ कृष्णो रक्षतु सामानि ह्यथर्वं माधवस्तथा । उपविष्टाश्च ये विप्रास्तेऽनिरुद्धेन रक्षिताः ॥ १२ ॥ यजमानं सपत्नीकं पुण्डरीकविलोचनः । रक्षाहीनं तु यत्स्थानं तत्सर्वं रक्षताद्धरिः ॥ १३ ॥ यदत्र संस्थितं भूतं स्थानमाश्रित्य सर्वदा ॥ स्थानं त्यक्त्वा तु तत्सर्वं यत्रस्थं तत्र गच्छतु ॥ १४ ॥ अपसर्पन्तु ते भूता ये भूमिसंस्थिताः ॥ ये भूता विघ्नकर्तारस्ते नश्यन्तु शिवाज्ञया ॥१५॥ अपक्रामन्तु भूतानि पिशाचास्सर्वतो दिशम् ॥ सर्वेषामविरोधेन शन्तिकर्म समारभे ॥१६॥ भूतानि राक्षसां वापि येऽत्र तिष्ठन्ति केचन ॥ ते सर्वेऽप्यपगच्छन्तु ग्रहयागं करोम्यहम् ॥ १७ ॥ वेदमन्त्रैश्च कर्तव्या रक्षा शुभ्रैश्च सर्षपैः । कृत्वा पोटलिकां पूर्वं बध्नीयाद्दक्षिणे करे ॥ १८ ॥

ॐ सदा बंधनन्दाक्षायणा हिरण्य ? शतानीकाय सुमनस्य

मा॑ना ६ ॥ तन्न्म॒ऽआबध्ना॑मि श॒त शा॑रदा॒य सु॑ष्म॒ाञ्जर॒ दष्ट्रि॑र्य॒थास॑म्॒ ॥ १ ॥

इति मन्त्रेण रक्षासूत्रमभिमन्त्र्य कर्मान्ते दक्षिणकरे बध्नीयात्। तन्मन्त्रौ—येन बद्धो बली राजा दानवेन्द्रो महाबलः। तेन त्वामभिबध्नामि रक्षे मा चल मा चल ॥ १ ॥

त्वँ उर्यविष्ठ दा॒शुषो॒नॄँ॒ः पा॒हि शृ॒णु॒धी गिर॑ः ॥ रक्षा॑ तो॒कमु॒त त्मना॑ ॥ २ ॥ रक्षा सुरक्षा भूयात् ॥

इति तिष्ठन् पूर्वादिदिक्षु विकिरेत् । उदकोपस्पर्शः । ततः पञ्चगव्यकरणम् ॥ गायत्र्या गोमूत्रम् । ॐ तत्स० ॥ १ ॥ गन्धद्वारेति गोमयम् ॥ ॐ गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् ॥ ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम् ॥ २ ॥ ॐ आप्यायस्वेति पयः ॥

ॐ आप्प्यायस्वसमेतुतेव्विश्श्वतः सोम वृष्ण्यम् । भवाव्वाजस्यसङ्गथे ॥ ३ ॥

ॐ दधिक्राव्ण इति दधि ॥ ॐ दधिक्राव्णो ॥ ४ ॥ ॐ तेजोसीति आज्यम् ॥

ॐ तेजोसिशुक्रमस्य मृतमसिधामनामासिप्प्रियन्देवानामनाधृष्ट

न्देवयजनमसि ॥ ५ ॥

ॐ देवस्यत्वेति कुशोदकम् । ॐ देवस्यत्वा० ॥ ६ ॥ ॐ प्रणवेन यज्ञकाष्ठेनालोड्य, "आपो हि ष्ठा" इति त्रिभिर्मन्त्रैः कर्मभूमिं यज्ञसम्भारांश्च प्रोक्षयेत् । ततः कृताञ्जलिः ॐ स्वस्ति न० ॥२॥ इति मन्त्रद्वयं पठेत् ॥ भूमौ प्रादेशं कृत्वा देवाः आयान्तु० यातुधाना अपयान्तु० विष्णोर्देवयजनं रक्षस्व । ततः सर्वतोभद्रदेवतास्थापनं पूजनं च कृत्वा सर्वतोभद्रे कलशस्थापनविधिना कलशं संस्थाप्य कलशोपरि प्रधानप्रतिमां संस्थाप्य विधिना पूजयेत् ॥

अथ सर्वतोभद्रलिङ्गतोभद्रकारिका ॥ प्रागुदीच्यां गता रेखाः कुर्यादेकोनविंशतिः ॥ खण्डेन्दुस्त्रिपदः कोणे शृङ्खला पञ्चभिः पदैः ॥ १ ॥ एकादशपदा वल्ली भद्रं तु नवभिः पदैः ॥ चतुर्विंशत्पदा वापी परिधिर्विंशतिः पदैः ॥ २ ॥ मध्ये षोडशभिः कोष्ठैः पद्ममष्टदलं स्मृतम् ॥ श्वेतेन्दुः शृङ्खला कृष्णा वल्ली नीलेन पूरयेत् ॥ ३ ॥ भद्राख्या सिता

वापी परिधिः पीतवर्णकः ॥ बाह्यान्तरदलः श्वेतः कर्णिका पीतवर्णिका ॥ ४ ॥ परिध्यावेष्टितं पद्मं बाह्ये सत्त्वरजस्तमः ॥ तन्मध्ये स्थापयेद्देवान् ब्रह्माद्यांश्च सुरेश्वरान् ॥ ५ ॥ इति सर्वतोभद्रकारिका ॥

अथ लिङ्गतोभद्रकारिका ॥ रेखात्वष्टादश प्रोक्ताश्चतुर्लिङ्गसमुद्भवे ॥ कोणेन्दुस्त्रिपदः श्वेतस्त्रिपदैः कृष्णाशृङ्खलाः ॥ १ ॥ वल्ली सप्त पदा नीला भद्रं रक्तं चतुष्पदम् ॥ भद्रपार्श्वे महारुद्रं कृष्णमष्टादशैः पदैः ॥२॥ शिवस्य पार्श्वतो वामीं कुर्यात्पञ्च पदां सिताम् ॥ पदमेकं तथा पीतं भद्रवाप्योस्तु मध्यतः ॥ ३ ॥ शिरसि शृङ्खलायाश्च कुर्यात्पीतपदत्रयम् ॥ लिङ्गानां स्कन्धतः कोष्ठा विंशतिः रक्तवर्णकाः ॥ ४ ॥ परिधिः पीतवर्णैस्तु पदः षोडशभिः स्मृतः ॥ पदैस्तु नवभिः पश्चाद्रक्तं पद्मं सकर्णिकम् ॥ ५ ॥ इति लिङ्गतोभद्रकारिका समाप्ता ॥

अथ पञ्चवर्णान्युक्तानि पञ्चरात्रे ॥ रजांसि पञ्चवर्णानि मण्डलार्थं हि कारयेत् ॥ शालितण्डुलचूर्णेन

शुक्लं वा यवसम्भवम् ॥१॥ रक्तं कुसुम्भसिन्दूरं गैरिकादिसमुद्भवम् ॥ हरितालोद्भवं पीतं रजनीसम्भवं क्वचित् ॥२॥ कृष्णादग्धैर्यवैः कार्यं हरितं विल्वचूर्णकम् ॥ कारयेत्सर्वधान्यैर्वा वर्णकैरुपशोभितम् ॥ ३ ॥

अथ भद्रे देवतास्थापनक्रमः॥साचार्यो यजमानः सर्वतोभद्रमण्डलसमीपे उपविश्य आचम्य ॥३॥प्राणानायम्य॥ मध्ये कर्णिकायां–ॐ भू० ब्रह्मणे नमः ब्रह्माणमावाहयामि स्थापयामि ॥१॥ एवमग्रेऽपि उत्तरे वाप्यां–ॐ भू० सोमाय० सोममा०॥२॥ इशान्यां खण्डेन्दौ– ॐ भू० ईशानाय० इशानं० ॥३॥ पूर्वे वाप्यां– ॐ भू० इन्द्राय० इन्द्रं ॥४॥ आग्नेयां खण्डेन्दौ– ॐभू० अग्नये० अग्निमा०॥५॥दक्षिणे वाप्यां–ॐभू० वायवे० वायु ॥६॥ॐभू० यमाय०यम० ॥७॥ नैर्ऋत्यां खण्डेन्दौ–ॐभू० निर्ऋतये० निर्ऋतिमा०॥८॥ पश्चिमे वाप्यां–ॐ भू० वरुणाय वरुणमा० ॥९॥ वायव्यां खण्डेन्दौ– ॐभू० वायवे० वायुमा० ॥१०॥वायुसोममध्ये भद्रे लिङ्गे वा– ॐभू० अष्टवसुभ्यो० अष्टवसून्० ॥११॥सेमेशानमध्ये भद्रे लिङ्गे– ॐ भू० एकादशरुद्रेभ्यो० एकादशरुद्राना०॥ १२ ॥ इशानेन्द्रमध्ये– ॐ भू०

द्वादशादित्येभ्यो० द्वादशादित्या० ॥ १३ ॥ इन्द्राग्नयोर्मध्ये भद्रे लिङ्गे- ॐ भू० अश्विभ्यां० अश्विनौ० ॥१४॥ अग्नियममध्ये भद्रे लिङ्गे- ॐ भू० सपैतृकविश्वेभ्यो देवेभ्यो० सपैतृकविश्वान्देवाना० ॥ १५ ॥ यमनिर्ऋति-मध्ये लिङ्गे- ॐ भू० सप्तयक्षेभ्यो० सप्तयक्षाना० ॥१६॥ निर्ऋतिवरुणमध्ये भद्रे लिङ्गे- ॐ अष्टकुलनागेभ्यो० अष्टकुलनागाना० ॥१७॥ वरुणवायुमध्ये भद्रे लिङ्गे- ॐ भू० गन्धर्वाप्सरोभ्यो० गन्धर्वाप्सरसः आवा० ॥१८॥ ब्रह्मसोममध्ये लिङ्गे वाप्यां-ॐभू० स्कन्दाय० स्कन्दमा०॥१९॥ तदुत्तरे-ॐ भू० वृषभाय०वृषभमा०॥२०॥ तदुत्तरे- ॐ भू० शूलाय० शूलमा० ॥ २१ ॥ तत्रैव- ॐ भू० महाकालाय० महाकालमा० ॥ २२ ॥ ब्रह्मेशानमध्ये शृङ्खलायां- ॐ भू० दक्षादिसप्तगणेभ्यो० दक्षादिसप्तगणाना० ॥ २३ ॥ ब्रह्मेन्द्रमध्ये वाप्यां- ॐ भू० दुर्गायै० दुर्गामा० ॥ २४ ॥ तत्पूर्वे- ॐ भू०विष्णवे० विष्णुमा० ॥२५॥ ब्रह्माग्निमध्ये शृङ्खलायां- ॐ भू० स्वधायै० स्वधामा० ॥ २६ ॥ ब्रह्मयममध्ये वाप्यां- ॐ भू० मृत्युरोगेभ्यो० मृत्युरोगा० ॥ २७ ॥ ब्रह्मनिर्ऋतिमध्ये शृङ्ख-

लायां– ॐ भू० गणपतये० गणपतिमा० ॥ २८ ॥ ब्रह्मवरुणमध्ये वाप्यां– ॐ भू० अद्भ्यो० अपः आ० ॥ २९ ॥ ब्रह्मवायुमध्ये शृङ्खलायां– ॐ भू० मरुद्भ्यो० मरुतः आ० ॥ ३० ॥ ब्रह्मणः पादतले कर्णिकाधः मध्ये एव– ॐ भू० पृथिव्यै० पृथिवीमा० ॥ ३१ ॥ तत्रैव– ॐ भू० गङ्गादिनदीभ्यो० गङ्गादिनदीः आ० ॥ ३२ ॥ तदुत्तरे तत्रैव– ॐ भू० सप्तसागरेभ्यो० सप्तसागरा० ॥ ३३ ॥ तदुपरि कर्णिकापरिधौ– ॐ भू० मेरवे० मेरुमा० ॥ ३४ ॥ बाह्यपरिधौ सोमसमीपे– ॐ गदायै० गदामा० ॥ ३५ ॥ ईशानान्तिके– ॐ भू० त्रिशूलाय० त्रिशूलमा० ॥३६॥ इन्द्रान्तिके– ॐ भू० वज्राय० वज्रमा० ॥३७॥ अग्निसमीपे– ॐ भू० शक्तये० शक्तिमा० ॥ ३८ ॥ यमान्तिके– ॐ भू० दण्डाय० दण्डमा० ॥३९॥ निर्ऋतिसमीपे० ॐ भू० खड्गाय० खड्गमा० ॥४०॥ वरुणान्तिके– ॐ भू० पाशाय० पाशमा० ॥ ४१ ॥ वायुसमीपे– ॐ भू० अङ्कुशाय० अङ्कुशमा० ॥ ४२ ॥ तद्बाह्ये उत्तरे– ॐ भू० गौतमाय० गौतमा० ॥ ४३ ॥ इशान्ये– ॐ भू०भरद्वाजाय० भरद्वाजमा० ॥ ४४ ॥

पूर्वे– ॐ विश्वामित्राय० विश्वामित्रमा० ॥४५॥ आग्नेयां– ॐ भू० कश्यपाय० कश्यपमा० ॥४६॥ दक्षिणे– ॐ भू० जमदग्नये० जमदग्निमा० ॥४७॥ ॐ भू० वसिष्ठाय० वसिष्ठमा० ॥ ४८ ॥ पश्चिमे– ॐ भू० अत्रये० अत्रिमा० ॥४९॥ वायव्यां– ॐ भू० अरुन्धत्यै० अरुन्धतीमा० ॥५०॥ तद्बाह्ये पूर्वादिक्रमेण– ॐ भू० ऐन्द्र्यै० ऐन्द्रीमा० ॥ ५१ ॥ ॐ भू० कौमार्यै० कौमारीमा०॥ ५२ ॥ ॐ भू० ब्राह्म्यै० ब्राह्मीमा० ॥५३॥ ॐ भू० वाराह्यै० वाराहीमा० ॥ ५४ ॥ ॐ भू० चामुण्डायै० चामुण्डामा० ॥ ५५ ॥ ॐ भू० वैष्णव्यै० वैष्णवीमा० ॥ ५६ ॥ ॐ भू० माहेश्वर्यै० माहेश्वरीमा० ॥ ५७ ॥ ॐ भू० वैनायक्यै० वैनायकीमा० ॥ ५८ ॥ इति रुद्रकल्पद्रुमानुसारी सर्वतोभद्रदेवताः ॥

अथ लिङ्गतोभद्रदेवताविशेषः ॥ तद्बाह्ये पूर्वे– असिताङ्गभैरवाय० असिताङ्गभैरवमा० ॥ १ ॥ आग्नेयां– ॐ भू० रुरुभैरवाय० रुरुभैरवमा० ॥ २ ॥ दक्षिणे– ॐ भू० चण्डभैरवाय० चण्डभैरवमा० ॥ ३ ॥ नैर्ऋत्यां–

ॐ भू० क्रोधभैरवाय० क्रोधभैरवमा० ॥ ४ ॥ पश्चिमे– ॐ भू० उन्मत्तभैरवाय० उन्मत्तभैरवमा० ॥ ५ ॥ वायव्यां– ॐ भू० कपालभैरवाय० कपालभैरवमा० ॥ ६ ॥ उत्तरे– ॐ भू० भीषणभैरवाय० भीषणभैरवमा० ॥७॥ ईशान्यां– ॐ भू० संहारभैरवाय० संहारभैरवमा० ॥८॥ तद्बाह्ये पूर्वादिक्रमेण– ॐ भू० भवाय० भवमा० ॥ ९ ॥ ॐ भू० शर्वाय० शर्वमा० ॥ १० ॥ ॐ भू० पशुपतये० पशुपतिमा० ॥ ११ ॥ ॐ भू० ईशानाय० ईशानमा० ॥ १२ ॥ ॐ भू० रुद्राय० रुद्रमा० ॥ १३ ॥ ॐ भू० उग्राय० उग्रमा० ॥१४॥ ॐ भू० भीमाय० भीममा० ॥१५॥ ॐ भू० महते० महान्तमा० ॥१६॥ ॐ भू० अनन्ताय० अनन्तमा० ॥१७॥ ॐ भू० वासुकये० वासुकिमा० ॥ १८ ॥ ॐ तक्षकाय० तक्षकमा० ॥ १९ ॥ ॐ भू० कुलिशाय० कुलिशमा० ॥ २० ॥ ॐ भू० कर्कोटकाय० कर्कोटकमा० ॥२१॥ ॐ भू० शङ्खपालाय० शङ्खपालमा० ॥२२॥ ॐ भू० कम्बलाय० कम्बलमा० ॥ २३ ॥ ॐ भू० अश्वतराय० अश्वतरमा० ॥ २४ ॥ ईशानेन्द्रयोर्मध्ये– ॐ भू० शूलाय० शूलमा० ॥२५ ॥

इन्द्राग्न्योर्मध्ये– ॐ भू० चन्द्रमौलिने० चन्द्रमौलिनमा० ॥२६॥ अग्नियमयोर्मध्ये– ॐ भू० चन्द्रमसे० चन्द्रमसमा० ॥ २७ ॥ यमनिर्ऋतिमध्ये– ॐ भू० वृषभध्वजाय० वृषभध्वजमा० ॥ २८ ॥ निर्ऋतिवरुणयोर्मध्ये– ॐ भू० त्रिलोचनाय० त्रिलोचनमा० ॥ २९ ॥ वरुणवायुमध्ये ॐ भू० शक्तिधराय० शक्तिधरमा० ॥ ३० ॥ वायुसोमयोर्मध्ये– ॐ भू० महेश्वराय० महेश्वरमा० ॥ ३१ ॥ सोमेशानयोर्मध्ये– ॐ भू० शूलपाणये० शूलपाणिमा० ॥३२॥ इति लिङ्गतोभ० दे० ॥ २ ॥

तत्र भद्रमध्ये ताम्रकलशं प्रतिष्ठाप्य तस्योपरि स्वर्णमयीं प्रधानप्रतिमामग्न्युत्तारणपूर्वकं स्थापयेत् ॥

अथाग्न्युत्तारणविधिः ॥ तत्राचार्यः पात्रान्तरे प्रतिमां निधाय घृतेनाभ्यज्य उपरि जलधारां कुर्यात ॥

तत्र मन्त्राः–

ॐ समुद्रस्यत्वावकयाग्ग्ने परिंव्ययामसि ॥ पावकोऽअस्म्मब्भ्यं ६ शिवोभव ॥ १ ॥ ॐ हिमस्यत्त्वा जरायुणाग्ग्ने परिंव्ययामसि ॥ पावकोऽअस्म्मब्भ्यं ६ शिवोभव ॥ २ ॥ ॐ उपज्ज्मन्नुपवेतसेवतरनदीष्ष्वा ॥ अग्ग्ने पित्तमपामसि मण्डूकिताभिरागहि सेमन्नो यज्ञम्पावकवर्ण्णं ६ शिवङ्कृधि ॥ ३ ॥ ॐ अपामिदन्न्य

यनं ६ समुद्रस्यं निवेशनम्॥ अन्यांस्तेऽअस्मत्तपन्तु हेतयं ÷ पाव
कोऽअस्मभ्यं ६ शिवो भंव॥ ४ ॥ ॐ अग्ग्ने पावक रोचिषा
मन्द्रयांदेव जिह्वयां ॥ आदेवान्वक्षि यक्षि च ॥ ५ ॥ ॐ सनं ÷
पावकदीदिवोग्ग्ने देवाँ २ऽइहावंह ॥ उपंयुज्ञ ६ हविश्चं न ः
॥ ६ ॥ ॐ पावकया यश्चित्तयंन्त्याकृपाक्षा मंन्नुरुचऽउषसोन

भानुना ॥ तूर्व्वन्नर्या मन्नेतं शस्यनूरणऽआयो घृणेन तं तृषा
णोऽअजरं ÷ ॥ ७ ॥ ॐ नमस्तेहरसे शोचिषे नमस्तेऽअस्त्व
र्च्चिषे ॥ अन्न्याँस्तेऽअस्म्मत्तपन्तु हेतयं ÷ पावकोऽअस्म्मब्भ्य
ह्वं शिवो भव ॥ ८ ॥ ॐ नृषदेव्वेडप्सुषदेव्वेड्ढर्हिषदे
व्वेड्वनसदेव्वेट्स्वर्व्विदेव्वेट् ॥ ९ ॥ ॐ ये देवा देवानां य्यज्ञि

या सुज्ञियानाᳪ संवत्सरीणमुपभागमासते ॥ अहुता दो हविषो यज्ञेऽअस्मिन्त्स्वयम्पिबन्तु मधुनाघृतस्य ॥ १० ॥
ॐ ये देवा देवेष्वधि देवत्त्वमायन्न्ये ब्रह्मणः पुरऽएतारोऽअस्य ॥ येब्भ्योनऽऋते पवते धाम किञ्चनतेदिवो नऽपृथिव्याऽअधिस्नुषु ॥ ११ ॥ ॐ प्राणदाऽअपानदा व्यानदाव्वर्च्चोदा व्वरिवो

दा ३ ॥ अन्न्याँस्तेऽ अस्म्मत्तपन्तु हेतयं ÷ पावकोऽअस्म्मब्भ्यं ६ शिवोभंव ॥ १२ ॥ इति अग्न्युत्तारणं विधाय प्राणप्रतिष्ठां कुर्यात् ॥

तद्यथा— ॐ अस्य श्रीप्राणप्रतिष्ठामन्त्रस्य ब्रह्मविष्णुमहेश्वरा ऋषयः। ऋग्यजुःसामाथर्वाणि छन्दांसि। पराप्राणशक्तिर्देवता। आं बीजम्। ह्रीं शक्तिः। क्रौं कीलकम्। श्रीमदनन्तस्य प्राणप्रतिष्ठापने विनियोगः। ततः प्रतिमां हस्तेन संस्पृश्य बीजमन्त्रान् जपेत् ॥ ॐ आं ह्रीं क्रौं अं यं रं लं वं शं षं सं हं लं क्षं अः क्रौं ह्रीं आं अमुकस्य प्राणा इह प्राणाः ॥ पुनः आं ह्रीं० अमुकस्य जीव इह स्थितः ॥ ॐ आं ह्रीं क्रौं अं० अमुकस्य सर्वेन्द्रियाणि वाङ्मनस्त्वक्चक्षुःश्रोत्रजिह्वाघ्राणपाणिपादपायूपस्थानीहागत्य सुखं चिरं तिष्ठन्तु स्वाहा ॥ अस्यै प्राणाः प्रतिष्ठन्तु अस्यै प्राणाः क्षरन्तु च। अस्यै देवत्वमर्चायै मामहेतीति कश्चन ॥ १ ॥

ॐ मनोजूतिर्ज्जुषतामाज्यस्य बृहस्पतिर्यज्ञमिमन्तनोत्व रिष्टं यज्ञ समिमन्दधातु ॥ विश्वे देवास इहमादयन्ताम ३ प्रतिष्ठ ॥ १३ ॥ एष वै प्रतिष्ठानाम यज्ञो यत्रैतेन यज्ञेन यजन्ते सर्वमेव प्रतिष्ठितं भवति ॥ १४ ॥

ब्राह्मणमन्त्रः प्रतिष्ठितो भव । देवतासव्यकर्णे गायत्रीं जपित्वा 'नेत्रोन्मीलनम्'— ॥

ॐ वृत्रस्यासिकनीनकश्चक्षुर्दाऽअसि चक्षुर्म्मे देहि ॥ १५ ॥

असुनीते० । चत्वारि वाक्० । गर्भाधानादिसंस्कारसिद्ध्यर्थं पञ्चदश प्रणवावृत्तीः करिष्ये । ॐ ॐ० ॥ एवं प्राणप्रतिष्ठां कृत्वा प्रतिमां पूजयेत् ॥ इत्यग्न्युत्तारणादिविधिः समाप्तः ॥

ततोऽग्निस्थापनं कुण्डे स्थण्डिले वा । कुण्डं चेत् उपरिमेखलायां श्वेतवर्णं विष्णुं "इदं विष्णुर्विचक्रमे" इति मन्त्रेण पूजयेत् ॥ मध्यरेखायां रक्तवर्णं ब्रह्माणं "ब्रह्म यज्ञानम्" इति मन्त्रेण सम्पूज्य ॥ अधो मेखलायां कृष्णवर्णं रुद्रं "नमस्ते रुद्र मन्यवे" इति मन्त्रेण सम्पूज्य ॥ योन्यां रक्तवर्णां गौरीं "अम्बेऽअम्बिके" इति मन्त्रेण पूजयेत् ॥ ततः अस्मिन् ग्रहशान्त्याख्ये कर्मणि पञ्च भूःसंस्कारपूर्वकमग्निस्थापनं करिष्ये इति संकल्प्य ॥ दर्भैः परिसमुह्य तान् कुशानैशान्यां परित्यज्य । गोमयोदकेनोपलिप्य । स्फ्येन स्रुवेण वा उल्लिख्य । उल्लेखनक्रमेणानामिकाङ्गुष्ठाभ्यां मृदमुद्धृत्य । उदकेनाभ्युक्ष्य । "अग्निन्दूतम्" इति अग्निं स्थापयेत् । तत्र मन्त्रः—

ॐ अग्निन्दूतम्पुरो दधे हव्यवाहमुपब्रुवे॥ देवाँ२ऽआसादयादिह ॥१॥

अथ सूर्यादिग्रहाणां स्थापनक्रमः ॥ ईशाने मण्डलं कृत्वा ग्रहाणां स्थापनं ततः । वृत्तमण्डलमादित्यमर्धचन्द्रं निशाकरम् ॥ १ ॥ त्रिकोणं मङ्गलं चैव बुधं च धनुषाकृतिम् । गुरुमष्टदलं प्रोक्तं चतुष्कोणं च भार्गवम् ॥ २ ॥ नराकृतिं शनिं विद्याद्राहुं च मकराकृतिम् । केतुं खड्गसमं ज्ञेयं ग्रहमण्डलके शुभे ॥३॥ अथवा ॥ वृत्तमण्डलमादित्यं चतुरस्रं निशाकरम् । त्रिकोणं मङ्गलं चैव बुधं वै बाणसन्निभम्॥१ ॥गुरवे पट्टिशाकारं पञ्चकोणं भृगुस्तथा। मन्दे च धनुषाकारं शूर्पाकारं तु राहवे ॥२॥ केतवे च ध्वजाकारं मण्डलानि क्रमेण तु । शुक्रार्कौ प्राङ्मुखौ ज्ञेयौ गुरुसौम्यावुदङ्मुखौ । प्रत्यङ्मुखो सोमोशनी शेषा दक्षिणतोमुखाः ॥३॥ मध्ये तु भास्करं विद्याच्छशिनं पूर्वदक्षिणे । दक्षिणे लोहितं विद्याद्बुधं पूर्वोत्तरेण तु ॥ ४ ॥ उत्तरेण गुरुं विद्यात्पूर्वेणैव तु भार्गवम् ॥ पश्चिमे तु शनिं विद्या-

द्राहु दक्षिणपश्चिमे ॥ ५ ॥ पश्चिमोत्तरतं केतु इत्येषा ग्रहसंस्थितिः । आदित्याभिमुखास्सर्वे साधिप्रत्यधिदेवताः ॥ ६ ॥ अधिदेवता दक्षिणे वामे प्रत्यधिदेवताः । अरुणौ सूर्यभौमौ च श्वेतौ शुक्रनिशाकरौ । हरितवर्णो बुधश्चैव पीतवर्णो गुरुस्तथा ॥ ७ ॥ कृष्णवर्णौ शनीराहू केतवस्तु तथैव च ॥ ततः पूर्वनिर्मितग्रहवेद्यां श्वेतवस्त्रं प्रसार्य नवग्रहमण्डलं विलिख्य मध्यादिकोष्ठेषु उक्तदिक्षु विदिक्षु सूर्यादिग्रहाणां स्थापनं पूजनं च कुर्यात् ॥

अथ सूर्याद्यावाहनम्॥ पद्मासनः पद्मकरः पद्मगर्भसमद्युतिः । सप्ताश्वरथसंस्थश्च द्विभुजः स्यात् सदा रविः॥१॥ श्वेतः श्वेताम्बरधरः श्वेताश्वः श्वेतभूषणः । गदापाणिर्द्विबाहुश्च कर्तव्यो वरदः शशी॥२॥ रक्तमाल्याम्बरधरः शक्तिशूलगदाधरः । चतुर्भुजो मेषगमो वरदः स्याद्धरासुतः ॥ ३ ॥ पीतमाल्याम्बरधरः कर्णिकारसमद्युतिः । गदापाणिर्द्विबाहुश्च सिंहस्थो वरदो बुधः ॥ ४ ॥ देवदैत्यगुरू तद्वत्पीतश्वेतौ चतुर्भुजौ । दण्डिनौ वरदौ कार्यौ साक्षसूत्रकमण्डलू ॥ ५ ॥ इन्द्रनीलद्युतिः शूली वरदो गृध्रवाहनः । बाणबाणासनधरः कर्तव्योऽर्कसुतः सदा॥ ६ ॥

नीलाम्बरो नीलवपुः किरीटी मुकुटोज्ज्वलः । नीलसिंहासनस्थश्च राहुरत्र प्रशस्यते ॥ ७ ॥ धूम्रा द्विबाहवः सर्वे गदिनो विकृताननाः । गृध्रासनगता नित्यं केतवः स्युर्वरप्रदाः ॥ ८ ॥ इत्युक्तप्रकारेण नवग्रहाणां ध्यानं सम्पाद्य "अन्ये किरीटिनः कार्या वरदाभयपाणयः" इति अन्यांश्च सामान्येन ध्यात्वा ॐआकृष्णेनेत्यादिवेदमन्त्रैर्नाममन्त्रैर्वा–

ॐ आदित्याय नमः । ॐ सोमाय नमः । ॐ भौमाय नमः । ॐ बुधाय नमः । ॐ बृहस्पतये नमः । ॐ शुक्राय नमः । ॐ शनैश्चराय नमः । ॐ राहवे नमः । ॐ केतुभ्यो नमः ॥

ॐ अग्नये नमः । ॐ अद्भ्यो नमः । ॐ भूम्यै नमः । ॐ विष्णवे नमः । ॐ इन्द्राय नमः । ॐ इन्द्राण्यै नमः । ॐ प्रजापतये नमः । ॐ सर्पेभ्यो नमः । ॐ ब्रह्मणे नमः ॥

ॐ विनायकाय नमः । ॐ वायवे नमः । ॐ दुर्गायै नमः । ॐ आकाशाय नमः । ॐ अश्विभ्यां नमः ॥ ॐ क्षेत्राधिपतये नमः । ॐ वास्तोष्पतये नमः ॥

ॐ इन्द्राय नमः । ॐ अग्नये नमः । ॐ यमाय नमः । ॐ निर्ऋतये नमः । ॐ वरुणाय नमः । ॐ वायवे नमः । ॐ कुबेराय नमः । ॐ ईशानाय नमः । ॐ ब्रह्मणे नमः । ॐ अनन्ताय नमः ॥ एभिर्मन्त्रैः आवाहनादिनीराजनान्त संपूज्य पुष्पाञ्जलिः कार्यः ॥

तन्मन्त्राः—ब्रह्मा मुरारिस्त्रिपुरान्तकारी भानुःशशी भूमिसुतो बुधश्च । गुरुश्च शुक्रः शनिराहुकेतवः सर्वे ग्रहाः शान्तिकरा भवन्तु ॥ १ ॥ सूर्य्यः शौर्य्यमथेन्दुरुच्चपदवीं सन्मङ्गलं मङ्गलः, सद्बुद्धिं च बुधो गुरुश्च गुरुतां शुक्रः शुभं शं शनिः । राहुर्बाहुबलं करोतु सततं केतुः कुलस्योन्नतिं, नित्यं प्रीतिकरा भवन्तु मम ते सर्वेऽनुकूला ग्रहाः ॥२॥ आयुश्च विद्यां च तथा सुखं च धर्मार्थलाभौ बहुपुत्रतां च । शत्रुक्षयं राजसु पूज्यतां च तुष्टा ग्रहाः क्षेमकरा भवन्तु ॥ ३ ॥

अथ सूर्यादिग्रहाणां वैदिकपूजाक्रमः—

ॐ आकृष्णेनरजसावर्तमानोनिवेशयन्नमृतम्मर्त्यञ्च ॥ हिरण्ययेनसवितारथेनादेवोयातिभुवनानिपश्यन् ॥ १ ॥

जपाकुसुमसंकाशं काश्यपेयं महाद्युतिम् । तमोरिं सर्वपापघ्नं सूर्य्यमावाहयाम्यहम् ॥ १ ॥ ॐ भूर्भुवः स्वः कलिङ्गदेशोद्भव काश्यपसगोत्र रक्तवर्ण भो सूर्य ? इहागच्छ इह तिष्ठ सूर्याय नमः । सूर्यमावाहयामि स्थापयामि॥१॥

ॐइमन्देवाऽअसपत्नᳬसुवद्ध्वम्महतेक्षत्रायमहतेज्ज्यैष्ठ्यायमहतेजानराज्ज्यायेन्द्रस्येन्द्रियाय॥इमममुष्यपुत्रममुष्यैपुत्रमस्यैविशऽएष

वौम्मीराजासोमोस्म्माकंम्ब्राह्मणानाꣳ राजा ॥ २ ॥

दधिशङ्खतुषाराभं क्षीरोदार्णवसम्भवम् । ज्योत्स्नापतिनिशानाथं सोममावाहयाम्यहम् ॥२॥ ॐ भू० यमुनातीरोद्भव आत्रेयसगोत्र शुक्लवर्ण भो सोम ? इहागच्छ इह तिष्ठ सोमाय नमः । सोममावाहयामि स्थापयामि ॥ २ ॥

ॐ अग्निर्मूर्द्धादिवः ककुत्पतिः पृथिव्याऽअयम् ॥ अपाꣳरेताꣳसि जिन्वति ॥ ३ ॥

धरणीगर्भसम्भूतं विद्युत्तेजस्समप्रभम् । कुमारं शक्तिहस्तं च भौममावाहयाम्यहम् ॥३॥ ॐ भू० अवन्तिकापुरोद्भव भारद्वाजसगोत्र रक्तवर्ण भो भौम ? इहागच्छ इह तिष्ठ भौमाय नमः । भौममावाहयामि० ॥ ३ ॥

ॐ उद्बुध्यस्वाग्ने प्रतिजागृहि त्वमिष्टापूर्त्ते सꣳ सृजेथामयञ्च ॥
अस्मिन्त्सधस्थे ऽअध्युत्तरस्मिन्विश्वेदेवा यजमानश्च सीदत ॥४॥

प्रियङ्गुकणिकाभासं रूपेणाप्रतिमं बुधम् । सौम्यासौम्यगुणोपेतं बुधमावाहयाम्यहम् ॥४॥ ॐभू० मगधदेशोद्भव आत्रेयसगोत्र हरितवर्ण भो बुध ? इहागच्छ इह तिष्ठ बुधाय नमः । बुधमावाहयामि० ॥ ४ ॥

ॐ बृहस्पते ऽअति यदर्यो ऽअर्हाद्द्युमद्विभाति क्रतुमज्जनेषु ॥ यद्दीदय
च्छवस ऽऋतप्रजात तदस्मासु द्रविणन्धेहि चित्रम् ॥५॥

देवानाञ्च मुनीनाञ्च गुरुं काञ्चनसन्निभम् । वन्द्यभूतं त्रिलोकानां गुरुमावाहयाम्यहम् ॥५॥ ॐ भू० सिन्धुदेशोद्भव आङ्गिरसगोत्र पीतवर्ण भो बृहस्पते इहागच्छ इह ? तिष्ठ बृहस्पतये० । बृहस्पतिमावाहयामि० ॥ ५ ॥

ॐ अन्नात्परिस्रुतो रसम्ब्रह्मणा व्यपिबत्क्षत्रम्पयः सोमम्प्रजापतिः । ऋतेन सत्यमिन्द्रियं विपानं ᳪ शुक्रमन्धस ऽइन्द्रस्येन्द्रियमिदम्पयोऽमृतम्मधु ॥ ६ ॥

हिमकुन्दमृणालाभं दैत्यानां परमं गुरुम् । सर्वशास्त्रप्रवक्तारं शुक्रमावाहयाम्यहम् ॥६॥ ॐ भू० भोजकटदेशोद्भव भार्गवसगोत्र शुक्लवर्ण भोशुक्र ? इहागच्छ इह तिष्ठ शुक्राय नमः । शुक्रमावाहयामि० ॥ ६ ॥

ॐ शन्नो देवीरभिष्टय ऽआपो भवन्तु पीतये। शंय्योरभिस्रवन्तु नः ७॥

नीलाम्बुजसमाभासं रविपुत्रं यमाग्रजम्। छायामार्तण्डसंभूतं शनिमावाहयाम्यहम् ॥७॥ ॐ भू० सौराष्ट्रदेशोद्भव काश्यपसगोत्र कृष्णवर्ण भो शनैश्चर ? इहागच्छ इह तिष्ठ शनैश्चराय० । शनैश्चरमावाहयामि० ॥ ७ ॥

ॐ कया नश्चित्र ऽआभुवदूती सदावृधः सखा। कया शचिष्ठया वृता ८॥

अर्द्धकायं महावीर्यं चन्द्रादित्यविमर्दनम्। सिंहिकागर्भसम्भूतं राहुमावाहयाम्यहम् ॥८॥ ॐ भू० राठिनापुरोद्भव पैठिनसगोत्र कृष्णवर्ण भो राहो ? इहागच्छ इह तिष्ठ राहवे नमः । राहुमावाहयामि० ॥ ८ ॥

ॐ केतुङ्कृण्वन्नकेतवे पेशो मर्य्या ऽअपेशसे। समुषद्भिरजायथाः॥९॥

पालासधूम्रसङ्काशं तारकाग्रहमस्तकम् । रौद्रं रौद्रात्मकं घोरं केतुमावाहयाम्यहम् ॥१॥ ॐ भू० अन्तर्वेदिसमुद्भव जैमिनसगोत्र कृष्णवर्ण भो केतो इहागच्छ इह तिष्ठ केतवे० । केतुमावाहयामि० ॥ १ ॥

ततोऽधिदेवतास्थापनं ग्रहदक्षिणपार्श्वे—

ॐ त्र्यम्बकंयजामहेसुगन्धिम्पुष्टिवर्धनम् ॥ उर्व्वारुकमिवबन्धनान्मृत्योर्मुक्षीयमामृतात् ॥१॥

पञ्चवक्त्रं वृषारूढमुमेशञ्च त्रिलोचनम् । आवाहयामीश्वरन्तं खट्वाङ्गवरधारिणम् ॥१॥ ॐ भू० ईश्वर ? इहागच्छ इह तिष्ठ ईश्वराय० । ईश्वरमावाहयामि० ॥ १ ॥

ॐ श्रीश्चतेलक्ष्मीश्चपत्न्यावहोरात्रे पार्श्वेनक्षत्राणिरूपमश्विनौ व्यात्तम् ॥ इष्णन्निषाणामुम्मंऽइषाणसर्व्वलोकम्मंऽइषाण ॥ २ ॥

हेमाद्रितनयां देवीं वरदां शङ्करप्रियाम् । लम्बोदरस्य जननीमुमामावाहयाम्यहम् ॥२॥ ॐ भू० उमे ? इहागच्छ इह तिष्ठ उमायै० । उमामावाहयामि० ॥ २ ॥

ॐ यदक्रन्दः प्रथमञ्जायमानऽउद्यन्त्समुद्रादुतवापुरीषात् ॥ श्येनस्य पक्षाहरिणस्यबाहूऽउपस्तुत्यम्महिजातन्तेऽअर्व्वन् ॥३॥

रुद्रतेजस्समुत्पन्नं देवसेनाग्रगं विभुम् । षण्मुखं कृत्तिकासूनुं स्कन्दमावाहयाम्यहम् ॥३॥ ॐ भू० स्कन्द ? इहागच्छ इह तिष्ठ स्कन्दाय० । स्कन्दमावाहयामि० ॥ ३ ॥

ॐ व्विष्णोर्रराटमसिव्विष्णो ᳪ श्नप्प्त्रेस्थोव्विष्णो ᳪ स्यूरसिव्विष्णोर्द्ध्रुवोसि ॥ वैष्णवमसिव्विष्णवेत्त्वा ॥ ४ ॥

देवदेवं जगन्नाथं भक्तानुग्रहकारकम् । चतुर्भुजं रमानाथं विष्णुमावाहयाम्यहम् ॥ ४ ॥ ॐ भू० विष्णो ? इहागच्छ इह तिष्ठ विष्णवे० । विष्णुमावाहयामि० ॥ ४ ॥

ॐ आब्रह्मन्न्ब्राह्मणोब्ब्रह्मवर्च्चसीजायतामाराष्ट्रेराजन्न्यᳪ शूरऽइ

षुव्व्योतिव्व्याधीमहारथोजायतान्दोग्ग्ध्रीधेनुर्व्वोढानड्वानाशुः सप्प्तिः
पुरन्धिर्य्योषाजिष्णूरथेष्ठाः सभेयोयुवास्ययजमानस्य व्वीरोजा
यतान्निकामे निकामेनः पर्ज्जन्न्योव्वर्षतुफलवत्योनऽओषधयः
पच्च्यन्तांय्योगक्क्षेमोनः कल्प्पताम् ॥ ५ ॥

कृष्णाजिनाम्बरधरं पद्मसंस्थं चतुर्मुखम् । वेदाधारं निरालम्बं विधिमावाहयाम्यहम् ॥ ५ ॥ ॐ भू० ब्रह्मन् ?
इहागच्छ इह तिष्ठ ब्रह्मणे० । ब्रह्माणमावाहयामि० ॥ ५ ॥

ॐ सजोषाऽइन्द्रसगणोमरुद्भिः सोमम्पिबवृत्रहा शूर विद्वान्॥ जहिशत्रूँ १रपमृधोनुदस्वाथाभयङ्कृणुहि विश्वतोनः-स्वाहा॥६॥

देवराजं गजारूढं शुनासीरं शतक्रतुम्। वज्रहस्तं महाबाहुमिन्द्रमावाहयाम्यहम् ॥ ६ ॥ ॐ भू० इन्द्र ? इहागच्छ इह तिष्ठ इन्द्राय०। इन्द्रमावाहयामि० ॥ ६ ॥

ॐ समायत्वाङ्गिरस्वते पितृमतेस्वाहा ॥ स्वाहा घर्म्माय स्वाहा घर्म्मः पित्रे ॥ ७ ॥

धर्मराजं महावीर्यं दक्षिणादिक्पतिं प्रभुम् । रक्तेक्षणं महाबाहुं यममावाहयाम्यहम् ॥ ७ ॥ ॐ भू० यम ? इहागच्छ इह तिष्ठ यमाय० । यममावाहयामि० ॥ ७ ॥

कार्षिरसिसमुद्रस्यत्त्वाक्षित्याऽउन्नयामि ॥ समापोऽअद्भिरग्गम तसमोषधीभिरोषधीः ॥८॥

अनाकारमनन्ताख्यं वर्त्तमानं दिनेदिने । कलाकाष्ठादिरूपेण कालमावाहयाम्यहम् ॥८॥ ॐ भू० काल ? इहागच्छ इह तिष्ठ कालाय० । कालमावाहयामि० ॥ ८ ॥

ॐ चित्रावसोस्वस्तितेपारमशीय- स्वाहा ॥ ९ ॥

धर्मराजं सभासंस्थं कृताकृतविवेकिनम् । आवाहयेच्चित्रगुप्तं लेखनीपत्रहस्तकम् ॥१॥ ॐ भू० चित्रगुप्त? इहागच्छ इह तिष्ठ चित्रगुप्ताय० । चित्रगुप्तमावाहयामि० ॥ १ ॥ ॥ ततः प्रत्यधिदेवतास्थापनं ग्रहवामपार्श्वे—

ॐ अग्निन्दूतम्पुरोदधे हव्यवाहमुपब्रुवे ॥ देवाँऽआसादयादिह ॥ १ ॥

रक्तमाल्याम्बरधरं रक्तपद्मासनस्थितम् । वरदाभयदन्देवमग्निमावाहयाम्यहम् ॥ १ ॥ ॐ भू० अग्ने ? इहागच्छ इह तिष्ठ अग्नये० । अग्निमावाहयामि० ॥ १ ॥

ॐ अप्स्वन्तरमृतमप्सुभेषजमपामुतम्प्रशस्तिष्वश्वा भवतवाजिनः ॥

१—मन्त्रार्थदीपिकादौ अयमेव मन्त्रः अपां स्थापने उक्तः । अत्र बीजं तु अपां सोमप्रत्यधिदेवत्वेन "सोमायाप्स्वन्तरित्यपि" इति स्कान्दं वचनमेव । सोमस्य इमं देवा इति याज्ञवल्क्याद्युक्तमन्त्रस्वीकारात् । रुद्रकल्पद्रुमे 'आपो हि ष्ठा' इति उक्तः । वरुणदेवतायाः प्रत्यधिदेवतात्वाभिप्रायेण उदुत्तमम् इति मन्त्रोऽपि सोमप्रत्यधिदेवतायाम् क्वचित् उक्तः ।

देवीरापोऽअपान्नपाद्यो वऽऊर्म्मिर्हविष्यऽइन्द्रियावान्मदिन्तमः । तं देवेभ्यो देवत्रा दत्त शुक्रपेभ्यो येषां भाग स्थ स्वाहा ॥

देवीरापोयोवंऽऊर्म्मिः प्प्रतूर्तिः ककुन्न्मान्न्वाजसास्तेनायं व्वाजं सेत् ॥ २ ॥

आदिदेवा समुद्भूताः जगच्छुद्धिकराः शुभाः । औषध्याप्यायनकरा अपामावाहयाम्यहम् ॥२॥ ॐ भू० आपः ! इहागच्छत इह तिष्ठत अद्भ्यो नमः । अपः आवाहयामि० ॥ २ ॥

ॐ स्योनापृथिविनो भवानृक्षरानिवेशनी॥ यच्छानः शर्म्म सप्प्रथाः ॥ ३ ।

शुक्लवर्णां विशालाक्षीं कूर्मपृष्ठोपरिस्थिताम् । सर्वसस्याश्रयां देवीं धरामावाहयाम्यहम्॥३॥ ॐ भू० पृथिवि ! इहागच्छ इह तिष्ठ पृथिव्यै० । पृथिवीमावाहयामि० ॥ ३ ॥

ॐ इदंव्विष्णुर्व्विचक्रमेत्रेधानिदधेपदम्॥समूढमस्यपाᳫंसुरेस्वाहा॥४॥

शङ्खचक्रगदापद्महस्तं गरुडवाहनम्। किरीटकुण्डलधरं विष्णुमावाहयाम्यहम्॥४॥ ॐ भू० विष्णो ? इहागच्छ इह तिष्ठ विष्णवे०। विष्णुमावाहयामि०॥४॥

ॐ त्रातारमिन्द्रमवितारमिन्द्रᳫंहवेहवेसुहवᳫंशूरमिन्द्रम्॥ह्वयामि शक्रम्पुरुहूतमिन्द्रᳫं स्वस्ति नोमघवाधात्विन्द्रः॥५॥

१ रुद्रकल्पद्रुमे संस्कारभास्करे च अयमेव मन्त्रः गुरुमत्यधिदेवताभूतस्येन्द्रस्योक्तः। अन्यत्रान्योऽप्युक्तः। एवमुत्तरत्र इन्द्राण्या अपि अन्यत्र अन्य एवोक्तः।

ऐरावतगजारूढं सहस्राक्षं शचीपतिम् । वज्रहस्तं सुराधीशमिन्द्रमावाहयाम्यहम् ॥५॥ ॐ भू० इन्द्र ? इहागच्छ इह तिष्ठ इन्द्राय नमः । इन्द्रमावाहयामि० ॥ ५ ॥

ॐ अदित्यैरास्नासिन्द्राण्याऽउष्णीषः ॥ पूषासिघर्म्मायदीष्व ॥ ६ ॥

प्रसन्नवदनां देवीं देवराजस्य वल्लभाम् । नानालङ्कारसंयुक्तां शचीमावाहयाम्यहम् ॥६॥ ॐ भू० इन्द्राणि ? इहागच्छ इह तिष्ठ इन्द्राण्यै० । इन्द्राणीमावाहयामि० ॥ ६ ॥

ॐ प्रजापतेनत्वदेतान्न्यन्न्योव्विश्श्वारूपाणिपरिताबभूव ॥ यत्कामास्तेजुहुमस्तन्नोऽअस्तु (१अयममुष्यपिताऽसावस्यपिता) व्वय ७ं

१—एतन्मध्यस्थं यजुःमन्त्रार्थदीपिकायामेव दृश्यते ।

स्यामपतयोरयीणाम् ॥ ७ ॥

आवाहयाम्यहं देवदेवेशं च प्रजापतिम् । अनेकव्रतकर्तारं सर्वेषां च पितामहम् ॥७॥ ॐ भू० प्रजापते ? इहागच्छ इह तिष्ठ प्रजापतये० । प्रजापतिमावाहयामि० ॥ ७ ॥

ॐ नमोऽस्तुसर्प्पेभ्योयेकेचं पृथिवीमनु ॥ येऽअन्तरिक्षे येदिविते भ्यः ÷ सर्पेभ्योनमः ÷ ॥ ८ ॥

अनन्ताद्यान्महाकायान्नानामणिविराजितान् । आवाहयाम्यहं सर्प्पान्फणान् सप्तकमण्डितान् ॥८॥ ॐ भू० सर्पाः? इहागच्छत इह तिष्ठत सर्प्पेभ्यो० । सर्पानावाहयामि० ॥ ८ ॥

ॐ ब्रह्मयज्ज्ञानम्प्रथमम्पुरस्ताद्विसीमतः सुरुचोव्वेनऽआव ᳪ ॥

स बुध्न्याऽउपमाऽअस्यव्विष्ठाः सतश्चयोनिमसतश्चव्विवः ॥१॥

हंसपृष्ठसमारूढं देवतागणपूजितम् । आवाहयाम्यहं देवं ब्रह्माणं कमलासनम् ॥१॥ ॐभू० ब्रह्मन् ? इहागच्छ इह तिष्ठ ब्रह्मणे० । ब्रह्माणमावाहयामि० ॥ १ ॥

ततो विनायकादिपञ्चलोकपालदेवताः वास्तोष्पतिं क्षेत्रपालं चावाहयेत्—

ॐगणानान्त्वागणपतिᳪ हवामहे प्रियाणान्त्वाप्रियपतिᳪ हवामहे

१—रुद्रकल्पद्रुमे संस्कारभास्करे च अयमेव मन्त्र उक्तः । अन्यत्राऽन्योऽपि ।

निधीनान्त्वानिधिपतिꣳ हवामहे वसोमम ॥ आहमंजानि गर्ब्भम्
धमात्वमंजासिगर्ब्भधम् ॥ १ ॥

लम्बोदरं महाकायं गजवक्त्रं चतुर्भुजम् । आवाहयाम्यहं देवं गणेशं सिद्धिदायकम् ॥१॥ ॐ भू० गणपते?
इहागच्छ इह तिष्ठ गणपतये० गणपतिमावाहयामि० ॥ १ ॥

ॐ अम्बेऽअम्बिकेम्बालिकेनमानयति कश्चन ॥ ससस्त्यश्वकः
सुभद्रिकाङ्काम्पीलवासिनीम् ॥ २ ॥

१—रुद्रकल्पद्रुमादावयमेवोक्तः । अन्यत्र त्वन्यः ।

पत्तने नगरे ग्रामे विपिने पर्वते गृहे । नानाजातिकुलेशानीं दुर्गामावाहयाम्यहम् ॥ २ ॥ ॐ भू० दुर्गे ? इहागच्छ इह तिष्ठ दुर्गायै० । दुर्गामावाहयामि० ॥ २ ॥

ॐ वायोयेतेसहस्रिणोरथासस्तेभिरागहि॥नियुत्वान्त्सोमपीतये॥३॥

आवाहयाम्यहं वायुं भूतानां देहधारिणम् । सर्वाधारं महावेगं मृगवाहनमीश्वरम् ॥ ३ ॥ ॐ भू० वायो ? इहागच्छ इह तिष्ठ वायवे० । वायुमावाहयामि० ॥ ३ ॥

ॐ घृतङ्घृतपावान ᳚ पिबतव्वसांव्वसापावान ᳚ पिबतान्तरिक्षस्यह

विरसि स्वाहा ॥ दिशः प्रदिशऽआदिशोविदिशऽउद्दिशोदिग्भ्यः स्वाहा ॥ ४ ॥

अनाकारं शब्दगुणं द्यावाभूम्यन्तरस्थितम् । आवाहयाम्यहं देवमाकाशं सर्वगं शुभम् ॥ ४ ॥ ॐ भू० आकाश ? इहागच्छ इह तिष्ठ आकाशाय० । आकाशमावाहयामि० ॥ ४ ॥

ॐ याबाङ्कशामधुमत्यश्विनासूनृतावती॥तयायज्ञम्मिमिक्षताम्॥५॥

देवतानां च भैषज्ये सुकुमारौ भिषग्वरौ । आवाहयाम्यहं देवावश्विनौ पुष्टिवर्द्धनौ ॥ ५ ॥ ॐ भू० अश्विनौ ? इहागच्छताम् इह तिष्ठताम् अश्विभ्यां नमः । अश्विनौ आवाहयामि० ॥ ५ ॥

ॐ वास्तोष्पते प्रतिजानीह्यस्मान्त्स्वावेशोऽअनमीवोभवानः ॥
यत्त्वेमहे प्रतितन्नोजुषस्वशन्नोभवद्विपदेशंचतुष्पदे ॥ ६ ॥

वास्तोष्पतिं विदिक्कायं भूशय्याभिरतं प्रभुम् । आवाहयाम्यहं देवं सर्वकर्मफलप्रदम् ॥ ६ ॥ ॐ भू० वास्तोष्पते ? इहागच्छ इह तिष्ठ वास्तोष्पतये० । वास्तोष्पतिमावाहयामि० ॥ ६ ॥

ॐ नहिस्पशमविदन्नन्यमस्माद्वैश्वानरात्पुरऽएतारमग्नेः ॥ एमै
नमवृधन्नमृताऽअमर्त्यंवैश्वानरक्षैत्रजित्यायदेवाः ॥ ७ ॥

भूतप्रेतपिशाचाद्यैरावृतं शूलपाणिनम् । आवाहयेत् क्षेत्रपालं कर्मण्यस्मिन्सुखाय नः ॥७॥ ॐ भू० क्षेत्राधिपते ! इहागच्छ इह तिष्ठ क्षेत्राधिपतये० । क्षेत्राधिपतिमावाहयामि ॥ ७ ॥

अथ मण्डलाद्बाह्ये दशदिक्पालानावाहयेत्—

ॐ त्रातारमिन्द्रमवितारमिन्द्र ᳪ हवेहवेसुहव ᳪ शूरमिन्द्रम् ॥ ह्वयामिशक्रम्पुरुहूतमिन्द्र ᳪ स्वस्तिनोमघवाधात्विन्द्रः ॥ ८ ॥

इन्द्रं सुरपतिं श्रेष्ठं वज्रहस्तं महाबलम् । आवाहयेत यज्ञसिध्यै शतयज्ञाधिपं प्रभुम् ॥ १ ॥ ॐ भू० इन्द्र ! इहागच्छ इह तिष्ठ इन्द्राय० । इन्द्रमावाहयामि० ॥ १ ॥

ॐ त्वन्नोऽअग्ग्नेतवदेवपायुभिर्म्मघोनोरक्षतन्वश्चवन्द्य॥ त्रातातोक स्यतनयेगवामस्यनिमेष ঌ रक्षमाणस्तवव्रते ॥ २ ॥

त्रिपादं सप्तहस्तं च द्विमूर्द्धानं द्विनासिकम् । षण्नेत्रं च चतुःश्रोत्रमग्निमावाहयाम्यहम् ॥ २ ॥ ॐ भू० अग्ने ? इहागच्छ इह तिष्ठ अग्नये० । अग्निमावाहयामि० ॥ २ ॥

असियमोऽअस्यादित्त्योऽअर्व्वन्नसित्रितोगुह्येनव्रतेन ॥ असिसोमेन समयाव्विपृक्तऽआहुस्ते त्रीणिदिविबन्धनानि ॥ ३ ॥

महामहिषमारूढं दण्डहस्तं महाबलम् । यज्ञसंरक्षणार्थाय यममावाहयाम्यहम् ॥३॥ ॐ भू० यम ? इहागच्छ इह तिष्ठ यमाय० । यममावाहयामि० ॥ ३ ॥

ॐ असुन्न्वन्तमयजमानमिच्छस्तेनस्येत्यामन्न्विहितस्करस्य ॥ अन्न्यमस्म्मदिच्छसातऽइत्त्यानमोदेविनिर्ऋतेतुब्भ्यमस्तु ॥ ४ ॥

सर्वप्रेताधिपं देवं निर्ऋतिं नीलविग्रहम् । आवाहयेत् यज्ञसिध्यै नरारूढं वरप्रदम् ॥४॥ ॐ भू० निर्ऋते ? इहागच्छ इह तिष्ठ निर्ऋतये० । निर्ऋतिमावाहयामि० ॥ ४ ॥

ॐ इमम्मेवरुणश्श्रुधीहवमद्याचमृडय ॥ त्वामवस्युराचके ॥५॥

शुद्धस्फटिकसङ्काशं जलेशं यादसां पतिम् । आवाहयेत् प्रतीचीशं वरुणं सर्वकामदम् ॥५॥ ॐ भू० वरुण ? इहागच्छ इह तिष्ठ० वरुणाय० । वरुणमावाहयामि ० ॥ ५ ॥

ॐ आनोनियुद्भिः शतिनीभिरध्वरꣳ सहस्रिणीभिरुपयाहियज्ञम् ॥ वायोऽअस्मिन्त्सवनेमादयस्वयूयम्पातस्वस्तिभिःसदा नः ॥६॥

मनोजवं महातेजं सर्वतश्चारिणं शुभम् । यज्ञसंरक्षणार्थाय वायुमावाहयाम्यहम् ॥ ६ ॥ ॐ भू० वायो ? इहागच्छ इह तिष्ठ वायवे० । वायुमावाहयामि० ॥ ६ ॥

ॐ [1]व्वय ꣳ सोम व्व्रते तव मनस्तनूषु विब्भ्रतः। प्रजावन्तꣳ सचेमहि॥

आवाहयामि देवेशं धनदं यक्षपूजितम्। महाबलं दिव्यदेहं नरयानगतिं विभुम् ॥ ७ ॥ ॐ भूः सोम ? इहागच्छ इह तिष्ठ सोमाय०। सोममावाहयामि० ॥ ७ ॥

ॐ तमीशानञ्जगतस्तस्थुषस्पतिन्धियञ्जिन्न्वमवसे हूमहे व्वयम्॥ पूषा नो यथा व्वेदसामसद्वृधे रक्षिता पायुरदब्धः स्वस्तये॥ ८॥

सर्वाधिपं महादेवं भूतानां पतिमव्ययम्। आवाहयेतमीशानं लोकानामभयप्रदम् ॥८॥ ॐ भुः ईशान ? इहागच्छ इह तिष्ठ ईशानाय० ईशानमावाहयामि० ॥ ८ ॥

१ संस्कारभास्करे सोमावाहनमुक्तम्।

ॐ अस्म्मेरुद्द्रामेहनापर्व्वतासोवृत्रहत्येभरंहूतौसजोषाः ॥ यः

शᳬसंतेस्तुवतेधायिपज्ज्रऽइन्द्रंज्ज्येष्ठाऽअस्म्माँ२ऽअंवन्तुदेवाः ॥९॥

पद्मयोनिं चतुर्मूर्तिं वेदगर्भं पितामहम् । आवाहयामि ब्रह्माणं यज्ञसंसिद्धिहेतवे ॥ १ ॥ पूर्वेशानयोर्मध्ये-

ॐ भू० ब्रह्मन्० ! इहागच्छ इह तिष्ठ ब्रह्मणे० ब्रह्माणमावाहयामि० ॥ १ ॥

ॐ स्योनापृथिविनोभवानृक्षरानिवेशनी ॥ यच्छानः शर्म्म

सप्प्रथाः ॥ १० ॥

अनन्तं सर्वनागानामधिपं विश्वरूपिणम् । जगतां शान्तिकर्तारं मण्डले स्थापयाम्यहम् ॥ १० ॥

निर्ऋतिपश्चिमयोर्मध्ये—ॐ भू० अनन्त ! इहागच्छ इह तिष्ठ अनन्ताय० अनन्तमावाहयामि० ॥ १० ॥ अस्यै प्राणाः प्रतिष्ठन्तु अस्यै प्राणाः क्षरन्तु च । अस्यै देवत्वमर्चायै मामहेतीति कश्चन ॥ ॐ मनोजुतिर्जु० ॥ ॐ सूर्यादिअनन्तान्तदेवताः सुप्रतिष्ठिता वरदा भवन्तु ॥ सूर्यादिअनन्तान्तदेवताभ्यो नमः, इति मन्त्रेण आसनाद्युपचारैः प्रत्येकमेकत्र वा काण्डानुसमयेन पदार्थानुसमयेन वा षोडशोपचारैः संपूज्य प्रार्थयेत् ॥

ॐ ग्रहाऽऊर्ज्जाहुतयो व्यन्तो विप्प्राय मतिम् । तेषां विशिप्प्रियाणां वो हमिषमूर्ज्ज ꣳ समग्ग्रभमुपयामगृहीतोसीन्द्राय त्त्वा जुष्टं गृह्णाम्म्येष ते योनिरिन्द्राय त्त्वा जुष्टतमम् ॥ ११ ॥

ब्रह्मा मुरारिस्त्रिपुरान्तकारी भानुः शशी भूमिसुतो बुधश्च । गुरुश्च शुक्रः शनिराहुकेतवः सर्वे ग्रहाः शान्तिकरा भवन्तु ॥ ११ ॥

ग्रहस्येशानदिग्भागे कलशस्थापनविधिना रुद्रकलशं संस्थाप्य कलशे वरुणं असंख्यातरुद्रांश्चावाह्य पूजयेत् ॥

ॐ असंख्याता सहस्राणि ये रुद्रा अधिभूम्याम् । तेषां ॐ सहस्र योजनेवधन्वानितन्मसि ॥

अस्मिन्कलशे ॐ असंख्यातरुद्रेभ्यो नमः असंख्यातरुद्रानावाहयामि० ॥

अथ कुशकण्डिकाकरणम् ॥ अग्नेर्दक्षिणतो ब्रह्मासनम् ॥ अग्नेरुत्तरतः प्रणीतासनद्वयम् ॥ ब्रह्मासने

ब्रह्मोपवेशनम् ॥ यावत्कर्म समाप्यते तावत् त्वं ब्रह्मा भव ॥ भवामीति प्रतिवचनम् ॥ ब्रह्मानुज्ञातः प्रणीताप्रणयनम् ॥ प्रणीय ॥ तत्र क्रमः—प्रणीतापात्रं पुरतः कृत्वा जलेनापूर्य कुशैराच्छाद्य ब्रह्मणो मुखमवलोक्य पश्चिमासने निधाय ब्रह्मणोऽनुमतिं गृहीत्वा आलभ्य पूर्वासने निदध्यात् ॥ ईशानादिपूर्वाग्रैः कुशैः परिस्तरणम् ॥ आग्नेयादीशानान्तम् ॥ ब्रह्मणोऽग्निपर्यन्तम् ॥ नैर्ऋत्याद्वायव्यान्तम् ॥ अग्नितः प्रणीतापर्यन्तम् ॥ अथ पात्रासादनम् ॥ पश्चादुत्तरतो वा स्यात् ॥ त्रीणि पवित्रे द्वे ॥ प्रोक्षणीपात्रम् ॥ आज्यस्थाली ॥ चरुस्थाली ॥ सम्मार्गकुशाः पञ्च ॥ उपयमनकुशाः सप्त ॥ समिधस्तिस्रः॥ स्रुवः ॥ आज्यम् ॥ तण्डुलाः ॥ पूर्णपात्रम् ॥ वृषनिष्क्रयदक्षिणा ॥ उपकल्पनीयानि द्रव्याणि निधाय ॥ पवित्रच्छेदनानि ॥ द्वयोरुपरि त्रीणि निधाय ॥

(१) समित्पवित्रं वेदश्च त्रयं प्रादेशसंमितम् । इध्मश्च द्विगुणः कायस्त्रिगुणः परिधिः स्मृतः ॥ १ ॥

(२) अष्टमुष्टि भवेत् किञ्चित् किञ्चिदष्टौ तु पुष्कलम् । पुष्कलानि च चत्वारि पूर्णपात्रं प्रचक्षते ॥ १ ॥

द्वौ मूलेन प्रदक्षिणीकृत्य ॥ त्रिभिश्छिद्य ॥ द्वौ ग्राह्यौ त्रिस्त्याज्यः ॥ प्रोक्षणीपात्रे प्रणीतोदकमासिच्य ॥ त्रिःपूर्णम् ॥ पवित्राभ्यामुत्पवनम् ॥ प्रोक्षण्याः सव्यहस्तकरणम् ॥ दक्षिणेनोद्दिङ्गनम् ॥ प्रणीतोदकेन प्रोक्षणीप्रोक्षणम् ॥ प्रोक्षण्युदकेन आज्यस्थाल्याः प्रोक्षणम् ॥ चरुस्थाल्याः प्रो० ॥ संमार्गकुशानां प्रो० ॥ उपयमनकुशानां प्रो० ॥ समिधां प्रो० ॥ स्रुवस्य प्रो० ॥ आज्यस्य प्रो० ॥ तण्डुलानां प्रो० ॥ पूर्णपात्रस्य प्रो० ॥ उपकल्पनीयानां पदार्थानां प्रो० ॥ असञ्चरे निधानम् ॥ प्रणीताग्न्योर्मध्ये प्रोक्षणीपात्रं निदध्यात ॥ आज्यस्थाल्यामाज्यनिर्वापः ॥ चरुस्थाल्यां प्रणीतोदकासेकपूर्वकं तण्डुलप्रक्षेपः ॥ ब्रह्मा दक्षिणात आज्याधिश्रयणं करोति ॥ चरोरधिश्रयणमाज्यस्योत्तरतः ॥ ज्वलदुल्मुकेनोभयोः पर्यग्निकरणम् ॥ इतरथावृत्तिः ॥ उदकोपस्पर्शः ॥ अर्धश्रिते चरौ अधोमुखस्य स्रुवस्य प्रतपनम् ॥ संमार्जनकुशैः स्रुवस्योर्ध्वमुखस्य संमार्जनम् ॥ * बुध्नादारभ्य कुशैरग्रपर्यन्तं संमृज्य अग्रादारभ्य अधस्तान्मूलैर्मू-

*—शिरोऽग्रं शिखरं मूलं बुध्नोऽङ्घ्रिनामकः । इत्यमरः ।

लान्तम् ॥ प्रणीतोदकेनाभ्युक्षणम् ॥ पुनः प्रतपनम् ॥ दक्षिणदेशे निधानम् ॥ आज्योद्वासनम् ॥ चरुं पूर्वेणानीयाग्नेरुत्तरतः स्थापयेत् ॥ चरोरुद्वासनम् ॥ अग्नेरुत्तरत एवाज्यं प्रदक्षिणीकृत्य आज्यस्योत्तरतः चरुं स्थापयेत् ॥ आज्योत्पवनम् ॥ आज्यावेक्षणम् ॥ अपद्रव्यनिरसनम् ॥ प्रोक्षण्युत्पवनम् ॥ उपयमनकुशादानम् ॥ तिष्ठन् तिस्रः समिधः अग्नौ प्रक्षिपेत् ॥ प्रोक्षण्युदकेन सपवित्रहस्तेन ईशानादि अग्नेः प्रदक्षिणं पर्युक्षणम् ॥ पवित्रयोः प्रणीतासु निधानम् ॥ ×–दक्षिणं जान्वाच्य ॥ ब्रह्मणा कुशैरन्वारब्धः ॥ स्रुवेणाज्यहोमः ॥ अग्नेरुत्तरभागे–ॐ प्रजापतये स्वाहा ॥ इदं प्रजापतये नमम ॥ अग्नेर्दक्षिणभागे–ॐ इन्द्राय स्वाहा ॥ इदमिन्द्राय नमम ॥ समिद्धतमे–ॐ अग्नये स्वाहा ॥ इदमग्नये नमम ॥ ॐ सोमाय स्वाहा ॥ इदं सोमाय नमम ॥ ततः सूर्यादिग्रहाणां अधिदेवताप्रत्यधिदेवतागणपत्यादि-

×—जान्वाच्य दक्षिणं, होम्यं स्रुवेण जुहुयाद्धविः । इति परशुरामकारिकावचनात ।

पञ्चलोकपालदेवतानां इन्द्रादिदशदिक्पालदेवतानां च प्रत्येकं [1]समित्तिलचर्वाज्यद्रव्यैः अष्टोत्तरशतमष्टाविंशतिमष्टौ वा जुहुयात् ॥ तत्र संकल्पः—[2]अस्मिन्ग्रहशान्तिकर्मणि इमानि हवनीयद्रव्याणि या या यक्ष्यमाणदेवतास्ताभ्यस्ताभ्यो मया परित्यक्तं न मम ॥ यथादैवतमस्तु ॥ इति कुशकण्डिकाकरणम् ॥ अथ सूर्यादिनवग्रहाणां प्रणवादि स्वाहान्तहोममन्त्राः ॥

१—अर्कः पलाशखदिरावपामार्गोऽथ पिप्पलः । औदुम्बरः शमीदूर्वाकुशाश्च समिधः क्रमात् ॥ १ ॥ एकैकस्याष्टकशतमष्टाविंशतिरष्ट वा । होतव्या मधुसर्पिर्भ्यां दध्ना चैव समन्विताः॥२॥ प्रादेशमात्रा अशिफा (अमूला) अशाखा अपलाशिनीः [पत्ररहिताः] । समिधः कल्पयेत्प्राज्ञः सर्वकर्मसु सर्वदा ॥३॥

२ यत्किञ्चिज्जुहुयादग्नौ तत्सर्वं त्यागपूर्वकम् । अन्यथा जुहुयाद्यस्तु नरकं स तु गच्छति ॥ अनेककर्तृकहोमे तु त्यागस्य विभिन्नकर्तृकत्वेन त्यागकालस्यातिसूक्ष्मतया ज्ञातुमशक्यत्वेन प्रत्याहुतित्यागासंभवात् होमारम्भकाले एव यक्ष्यमाणदेवतास्मरणं कृत्वा यजनीयद्रव्यं च मनसि निधाय इदं यथादैवतमस्तु न ममेत्येवं त्यागः कार्यः इति वृद्धाः ॥

ॐ गणानान्त्वा० धम्-स्वाहा ॥१॥ ॐ अम्बेऽअ० नीम्-स्वाहा ॥ २ ॥ ॐ आकृष्णे० पश्यन्-स्वाहा ॥ १ ॥ ॐ इमन्देवाऽअ० राजा-स्वाहा ॥ २॥ ॐ अग्निर्मू० स्वति-स्वाहा ॥ ३ ॥ ॐ उद्बुध्य० सीदत-स्वाहा ॥४॥ ॐ बृहस्प्प० चित्रम्-स्वाहा ॥ ५॥ ॐ अन्नात्प० मधु-स्वाहा ॥ ६ ॥ ॐ शन्नोदे० न्तुनः-स्वाहा ॥७॥ ॐ कयान० वृता-स्वाहा ॥ ८ ॥ ॐ केतुङ्कृ० यथाः-स्वाहा

॥ ९ ॥ ॐ त्र्यम्बकं० मृतात्-स्वाहा ॥ १० ॥ ॐ श्रीश्चते० इषाण-स्वाहा ॥ ११ ॥ ॐ यदक्रन्द० अर्वन्-स्वाहा ॥ १२ ॥ ॐ विष्णोरराट० वेत्वा-स्वाहा ॥१३॥ ॐ आब्रह्म०ताम्-स्वाहा ॥१४॥ ॐ सजोषा० तान्-स्वाहा ॥१५॥ ॐ समायन्त्वा० पित्रे-स्वाहा ॥ १६ ॥ ॐ कार्षिर० षधीः-स्वाहा ॥१७॥ ॐ चित्रावं० शीय-स्वाहा ॥१८॥ ॐ अग्निन्दू० दिह-स्वाहा ॥१९॥ ॐ अप्स्वन्तर०

व्वाजं॑सेत्-स्वाहा ॥ २० ॥ ॐ स्योनापृ॰ प्रथाः॑-स्वाहा ॥ २१ ॥ ॐ इदंव्विष्णु॰ सुरे-स्वाहा ॥ २२ ॥ ॐ त्रातारमिन्द्र॰ त्विन्द्रः स्वाहा ॥ २३ ॥ ॐ अदित्यै॰ दीष्व-स्वाहा ॥ २४ ॥ ॐ प्रजा पते॰ णाम्-स्वाहा ॥२५ ॥ ॐ नमोस्तुस॰ नमः स्वाहा ॥२६॥ ॐ ब्रह्मज॰ व्विवः स्वाहा ॥ ॥ २७ ॥ ॐ गणानां॰ धम्-स्वाहा ॥ २८ ॥ ॐ अम्बेऽअ॰ नीम्-स्वाहा ॥ २९ ॥ ॐ व्वातोवामनो॰

दधुं-स्वाहा ॥ ३० ॥ ॐ घृतंघृत० दिग्भ्यः-स्वाहा ॥ ३१ ॥ ॐ यावा
ङ्क० ताम्-स्वाहा ॥ ३२ ॥ ॐ व्वास्तोष्पते० ष्पदे-स्वाहा ॥ ३३ ॥
ॐ नहिस्पश० देवाः-स्वाहा ॥ ३४ ॥ ॐ त्रातारमि० त्विन्द्रं÷ स्वाहा
॥ ३५ ॥ ॐ त्वन्नोऽअग्ने० व्रते-स्वाहा ॥ ३६ ॥ ॐ सुमायुत्वा०
पित्रे-स्वाहा ॥ ३७ ॥ ॐ असुन्वन्त० मस्तु-स्वाहा ॥ ३८ ॥

ॐ इमम्मेंव्वरुण०राचके-स्वाहा॥३९॥ॐ आनोंनि०सदानꣳ-स्वाहा ॥४०॥ ॐ व्वयꣳसों० महि-स्वाहा ॥४१॥ ॐ तमीशानं० स्वस्त यें-स्वाहा ॥ ४२ ॥ ॐ अस्मेरुद्रा० देवाः-स्वाहा ॥ ४३ ॥ ॐ स्योनापृ० प्रथाꣳ-स्वाहा ॥ ४४ ॥

ततः प्रधानहोमः—प्रधानहोमानन्तरं ब्रह्मादिमण्डलदेवताश्च एकैकयाज्याहुत्या यद्वे शेषेण स्विष्टकृदादिहोमः ।

ॐ अग्ग्नेनयंसुपथांरायेऽअस्मान्विश्वानिदेव व्वयुनांनि विद्वान्॥

सुयो॒द्ध्य॒स्मज्जु॑हुरा॒णमेनो॒ भूयि॑ष्ठान्ते॒ नम॑ऽउक्तिं विधेम ॥ १ ॥

ॐ स्वाहा स्वधायुताग्नये वैश्वानराय नम इति मन्त्रेणाग्निं संपूज्य ॥ ततो हुतशेषद्रव्यं गृहीत्वा ॥ ब्रह्मणान्वारब्धः स्विष्टकृद्धोमं कुर्यात ॥ ॐ अग्नये स्विष्टकृते स्वाहा । इदमग्नये स्विष्टकृते न मम ॥ ततो भूरादिनवाहुतयः ॥ ॐ भूः स्वाहा । इदमग्नये न मम ॥ ॐ भुवः स्वाहा । इदं वायवे न मम ॥ ॐ स्वः स्वाहा । इदꣳ सूर्याय न मम ॥

ॐ त्वन्नो॑ऽअग्ने॒ वरु॑णस्य वि॒द्वान्दे॒वस्य॒ हेडो॒ऽअव॑ यासिसीष्ठा ६ ॥

यजिष्ठोव्वन्ह्नितमḥशोशुचानोव्विश्श्वाद्द्वेषाᳬंसिप्प्रमुमुग्ग्ध्यस्म्मत्-
स्वाहा ॥२॥ इदमग्नीवरुणाभ्यां न मम ॥

ॐ सत्वन्नोऽअग्ग्नेवमोभवोतीनेदिष्ठोऽअस्याऽउषसोव्युष्ष्टौ॥अवयक्क्ष्व
नोव्वरुणᳬंरराणोव्वीहिमृडीकᳬंसुहवोनऽएधि-स्वाहा॥३॥इदमग्नीवरुणाभ्यांनमम॥

ॐ अयाश्श्चाग्ग्नेऽस्यनभिशस्तिपाश्श्चसत्यमित्त्वमयाऽअसि॥अया
नोयज्ञंव्वहास्यानोधेहिभेषजᳬंस्वाहा ॥४॥ इदमग्नये अयसे न मम ॥

ॐ येतेशतंव्वरुणंयेसहस्त्रंयज्ञियाःपाशाविततामहान्तः ॥ तेभिर्न्नोऽ
अद्यसवितोतविष्णुर्व्विश्श्वेमुञ्चन्तु मरुतः स्वर्क्काः-स्वाहा ॥ ५ ॥

इदं वरुणाय सवित्रे विष्णवेविश्वेभ्यो१देवेभ्यो मरुद्भ्यः स्वर्केभ्यश्च न मम ॥

ॐ उदुत्तमंव्वरुणपाशमस्म्मदवाधमंव्विमध्यमं श्रथाय ॥ अथाव्व
यमादित्यव्व्रतेतवानागसोऽअदितयेस्याम-स्वाहा ॥६॥

इदं वरुणायादित्यायादितये न मम ॥ मनसा-ॐ प्रजापतये स्वाहा । इदं प्रजापतये न मम ॥ इति नवाहुतयः ॥

१ अत्र देवेभ्यो इति न वाच्यमिति गदाधरः ।

अग्न्यायतनस्य समन्ताद्दिक्षु विदिक्षुच दशदिक्पालानां सदीपमाषभक्तबलयो देयाः ॥

ॐ त्रातारमिन्द्रं० त्विन्द्रः। इन्द्राय साङ्गाय सपरिवारायसायुधाय सशक्तिकाय एतं सदीपमाष-भक्तबलिं समर्पयामि ॥ भो इन्द्र ? स्वां दिशं रक्ष बलिं भक्ष मम सकुटुम्बस्य सपरिवारस्य आयुःकर्ता क्षेमकर्ता शान्तिकर्ता पुष्टिकर्ता तुष्टिकर्ता वरदो भव ॥ अनेन बलिदानेन इन्द्रः प्रीयताम् इति बाल्युपरि जलं विसृजेत् ॥ एवं सर्वत्र ॥ १ ॥

ॐ त्वन्नोऽअग्ने० तवंव्रते । अग्नये सां० । भोअग्ने ?दिशं रक्ष बलिं० । अनेन० अग्निः प्रीयताम् ॥ २ ॥

ॐ यमायत्वा० पित्रे । यमाय सां० मि । भो यम ? दि० बलिं० । अ०यमः प्रीयताम् ॥३॥

ॐ असुन्वन्त० मस्तु-स्वाहा । निर्ऋतये सां० बलिं० मि । भो निर्ऋते ? दि० । अ० निर्ऋतिः प्रीयताम् ॥ ४ ॥

ॐ तत्त्वांयामि० षीः । वरुणाय सां० मि । भो वरुण ? दि० बलिं० अ० वरुणः प्रीयताम् ॥५॥

ॐ आनोनियु० नः । वायवे सां० मि । भो वायो ? दि० । अ० वायुः प्रीयताम् ॥ ६ ॥

ॐ व्रय ६ सोम० हि । सोमाय सां० मि । भो सोम ? दि० बलिं० । अ० सोमः प्री० ॥ ७ ॥

ॐ तमीशानं० ये । ईशानाय सां० मि । भो ईशान ? दि० । अ० ईशानः प्रीयताम् ॥ ८ ॥

ॐ अस्मे रुद्रासे० वाः । ब्रह्मणे सां० मि । भो ब्रह्मन् ? दि० बलिं० । अ० ब्रह्मा प्री० ॥९॥

ॐ स्योनापृ० प्रथाः । अनन्ताय सां० मि । भो अनन्त ? दि० बलिं । अ० अनन्तः प्री० ॥१०॥

ॐ आकृष्णेन० पश्यन् ॥ १ ॥ ततो ग्रहवेदीसमीपे ग्रहादिभ्यः सदीपमाष[1]... देयाः ॥

सूर्याय साङ्गाय सपरिवाराय सायुधाय सशक्तिकाय ईश्वराग्निरूपाधिदेवताप्रत्यधिदेवतासहिताय एतं सदीपमा-

१ गुडौदनं रेवर्दद्यात् सोमाय घृतपायसम् । अङ्गारकाय संयावं बुधाय क्षीरपिष्टकम् ॥ १ ॥ दध्योदनञ्च जीवाय शुक्राय च गुडौदनम् । शनैश्चराय कृसरमजामांसञ्च राहवे । चित्रौदनञ्च केतुभ्यः सर्वभक्ष्यैरथार्चयेत् ॥ २ ॥

षभक्तबलिं समर्पयामि । भो सूर्य ? इमं बलिं गृहाण मम सकुटुम्बस्य सपरिवारस्य आयुःकर्ताक्षेमकर्ता शुभकर्ता शान्तिकर्ता पुष्टिकर्ता तुष्टिकर्ता वरदो भव । अनेन बलिदानेन सूर्यः प्रीयताम् ॥१॥

ॐ इमन्देवा० राजा ॥ सोमाय सां० उमाऽपोरूपाधिदेवताप्रत्यधिदे० मि । भो सोम ? इमं बलिं० । अने० सोमः प्रीयताम् ॥ २ ॥

ॐ अग्निर्मू० जिन्वति । भौमाय सां० स्कन्दभूमिरूपाधिदेवताप्रत्यधिदे० मि । भो भौम ? इमं बलिं० । अनेन० भौमः प्री यताम् ॥३॥

ॐ उद्बुध्यस्वा० सीदत । बुधाय सां० नारायणविष्णुरूपाधिदेवता प्रत्यधिदेवतास० मि । भो बुध ? इमं० ब० । अनेन० बुधः प्रीयताम् ॥ ४ ॥

ॐ बृहस्प्पते० म् । बृहस्पतये सां० ब्रह्मेन्द्ररूपाधिदेवताप्रत्यधिदे० मि । भो बृहस्पते ? इमं ब० । अनेन० बृहस्पतिः प्रीयताम् ॥ ५ ॥

ॐ अन्नात्परि० मधु । शुक्राय सां० इन्द्रेन्द्राणीरूपाधिदेवताप्रत्यधिदे० मि । भो शुक्र इमं ब० । अनेन० शुक्रः प्रीयताम् ॥ ६ ॥

ॐ शन्नोदेवी० नः । शनैश्चराय सां० यमप्रजापतिरूपाधिदेवताप्रत्यधिदे० मि । भो शनैश्चर ? इमं ब० । अनेन० शनैश्चरः प्रीयताम् ॥ ७ ॥

ॐ कयानश्चि० वृता । राहवे सां० कालसर्परूपाधिदेवताप्रत्यधिदे० मि । भो राहो ? इमं ब० । अनेन० राहुः प्रीयताम् ॥ ८ ॥

ॐ केतुंकृण्वं० थाः । केतवे * सां० चित्रगुप्तब्रह्मरूपाधिदेवताप्रत्यधिदे० मि । भो केतो ? इमं ब० । अनेन० केतुः प्रीयताम् ॥ ९ ॥

ॐ गणानांत्वा० म् । गणपतये सां० मि । भो गणपते ? इमं ब० । अनेन० गणपतिः प्री० ॥१॥

अम्बेऽअम्बिके० नाम् । दुर्गायै साङ्गायै० मि । भो दुर्गे ? इमं० आयुष्कर्त्री त्वं० शां० पु०तु०

* केतूनां बहुत्वेऽपि गणत्वेन देवतात्वात् पूजादावेकवचनान्तमेव प्रयोगः ।

वरदा भव। अनेन० दुर्गा प्रीयताम् ॥ २॥

ॐ व्वायोऽ्ये०ये। वायवे सां० मि भो। वायो ? इमं ब०। अनेन०वायुः प्रीयताम् ॥ ३ ॥

ॐ घृतं घृत०स्वहा। आकाशाय सां० मि। भो आकाश ? इमं ब०। अने० आकाशः प्री० ॥४॥

ॐ याावाङ्कशा० म्। अश्विभ्यां साङ्गाभ्यां० मि। भो अश्विनौ ? इमं बलिं गृहीतं मम०आयुः-

कर्तारौ० वरदौ भवतम्। अनेन० अश्विनौ प्रीयेताम् ॥ ५ ॥

ॐ व्वास्तोष्पते प्र०दे। वास्तोष्पतये सां०मि। भो वास्तोष्पते ?इमं०।अनेन०वास्तोष्पतिः प्री०॥६॥

अथवा दिक्पालेभ्य एकतन्त्रेणैकमेव बलिं दद्यात् ॥

ॐ प्राच्यै दिशे स्वाहाऽर्वाच्यै दिशे स्वाहा दक्षिणायै दिशे स्वाहाऽर्वाच्यै दिशे स्वाहा प्रतीच्यै दिशे स्वाहाऽर्वाच्यै दिशे स्वाहोदीच्यै दिशे स्वाहाऽर्वाच्यै दिशे स्वाहोर्ध्वायै दिशे स्वाहाऽर्वाच्यै दिशे स्वाहाऽवाच्यै दिशे स्वाहाऽर्वाच्यै दिशे स्वाहा ॥ १ ॥

इन्द्रादिदशदिक्पालेभ्यः साङ्गेभ्यः सपरिवारेभ्यः सायुधेभ्यः एतान्सदीपमाषभक्तबलीन्समपर्यामि ॥ भो भो

इन्द्रादिदशदिक्पालाः ? साङ्गाः सपरिवाराः सायुधाः सशक्तिकाः मम स० आयुःकर्तारः क्षेमकर्तारः शान्तिकर्तारः पुष्टि-कर्तारः तुष्टिकर्तारः वरदाः भवत ॥ अनेन बलिदानेन इन्द्रादिदशदिक्पालाः प्रीयन्ताम् ॥ १ ॥ एवं सर्वेभ्यो ग्रहेभ्य एकतन्त्रेणैकमेव बलिं दद्यात् ।

ॐ ग्रहा ऽऊर्ज्जाहुतयो व्यन्तो विप्प्राय मतिम् ॥ तेषां विशिप्प्रियाणां वो हमिषमूर्ज्ज ६ समग्ग्रभमुपयामगृहीतोसीन्द्राय त्त्वा जुष्टं ङ्गृह्णाम्म्येष ते योनिरिन्द्राय त्त्वा जुष्टतमम ॥ सम्पृचौ स्त्थ ६ सम्मा भद्रेण पृङ्क्तं विपृचौ स्त्थो विमा पाप्मना पृङ्क्तम् ॥ २ ॥

सूर्यादिनवग्रहेभ्यः साङ्गेभ्यः सपरिवारेभ्यः सायुधेभ्यः सशक्तिकेभ्यः अधिदेवताप्रत्यधिदेवतागणपत्यादिपञ्चलोकपाल-वास्तोष्पतिसहितेभ्य एतं सदीपमाषभक्तबलिं समर्पयामि।। भो भो सूर्यादिग्रहाः? साङ्गाः सपरिवाराः सायुधाः सशक्तिकाः अधिदेवता-प्रत्यधिदेवता-गणपत्यादिपञ्चलोकपालवास्तोष्पतिसहिताः मम सकुटुम्बस्य सपरिवारस्य आयुःकर्तारः क्षेमकर्तारः शान्तिकर्तारः पुष्टिकर्तारः वरदा भवत ।। अनेन बलिदानेन सूर्यादिग्रहाः प्रीयन्ताम् ।।

अथ क्षेत्रपालबलिदानम् ।। एकस्मिन् वंशादिपात्रे कुशानास्तीर्य तदुपरि मनुष्याहारचतुर्गुणं द्विगुणं वा माषभक्तदध्योदनं जलपात्रं च निधाय चतुर्मुखं दीपं प्रज्वाल्य हरिद्राकुङ्कुमादिपताकायुतं कृत्वा ।।

ॐ नहिस्पशमविदन्नन्यमस्म्माद्वैश्वानरात्पुरऽएतारमग्नेः ।। एमेनमवृधन्नमृताऽअमर्त्यं वैश्वानरङ्क्षैत्रजित्यायदेवाः ।। ३ ।।

'ॐ क्षेत्रपालाय नमः' इति पञ्चोपचारैः षोडशोपचारैर्वा सम्पूज्य प्रार्थयेत् । ॐ नमो वै क्षेत्रपालस्त्वं भूतप्रेतगणैस्सह ॥ पूजाबलिं गृहाणेमं सौम्यो भवतु सर्वदा ॥ १ ॥ पुत्रान्देहि धनं देहि सर्वान्कामांश्च देहि मे ॥ आयुरारोग्यं मे देहि निर्विघ्नं कुरु सर्वदा ॥ २ ॥ ततो बलिदानम् ॥ क्षेत्रपालाय साङ्गाय सपरिवाराय सायुधाय सशक्तिकाय मारीगणभैरवराक्षस-कूष्माण्ड-वेतालभूतपिशाच-डाकिनी-शाकिनी-गणसहिताय एतं सदीपमाषभक्तबलिं समर्पयामि ॥ भो क्षेत्रपाल ? क्षेत्रं रक्ष बलिं भक्ष मम सकुटुम्बस्य सपरिवारस्य आयुःकर्ता क्षेमकर्ता शान्तिकर्ता पुष्टिकर्ता तुष्टिकर्ता वरदो भव ॥ अनेन बलिदानेन क्षेत्रपालः प्रीयताम् ॥ १ ॥ यजमानस्य मस्तकोपरि सकृद्भ्रामयित्वा अनवेक्षमाणेन दुर्बाह्मणेन शूद्रेण वा बलिं गृहीत्वा चतुष्पथे निक्षिपेत् ॥ ततो यजमानस्तस्य पृष्ठतो द्वारपर्यन्तं गत्वा जलं क्षिपेत् हिङ्कारेणेति मन्त्रेण ॥

ॐ हिङ्काराय स्वाहा हिङ्कृताय स्वाहा क्रन्दते स्वाहा अवक्रन्दाय स्वाहा
प्रोथते स्वाहा प्रप्रोथाय स्वाहा गन्धाय स्वाहा घ्राताय स्वाहा निविष्टाय
स्वाहोपविष्टाय स्वाहा सन्दिताय स्वाहा वल्गते स्वाहा सीनाय स्वाहा
शयानाय स्वाहा स्वपते स्वाहा जाग्रते स्वाहा कूजते स्वाहा प्रबुद्धाय स्वा
हा विजृम्भमाणाय स्वाहा विचृत्ताय स्वाहा सꣳहानाय स्वाहोपस्थि

तायस्वाहायंनायस्वाहाप्प्रायंणायस्वाहा ॥ ४ ॥

यजमानः पाणिपादं प्रक्षाल्याचम्य ॥ ततः नारिकेलादिफलं रक्तवस्त्रवेष्टितं द्वादशषट्चतुःस्रुवेण गृहीतमाज्यं स्रुच्यां कृत्वा "ॐ पूर्णाहुत्यै नमः" इति षोडशोपचारैः संपूज्य पूर्णाहुतिं जुहुयात्। तत्र मन्त्राः—

ॐ समुद्रादूर्म्मिर्म्मधुमाँ २ऽउदारदुपा ᳪं शुनासममृतत्वमानट् ॥ घृतस्यनामगुह्यंयदस्तिजिह्वादेवानाममृतंस्यनाभिः ॥ १ ॥ व्वयन्नामप्प्रब्रवामाघृतस्यास्मिन्यज्ञेधारयामानमोभिः ॥ उपब्ब्रह्माश्रृण

वच्छस्यमानञ्चतु ÷ शृङ्गोवमीद्गौरऽएतत् ॥ २ ॥ चत्वारिशृङ्गा
त्रयोऽअस्यपादाद्वेशीर्षेसप्तहस्तासोऽअस्य॥ त्रिधाबद्धोव्वृषभोरौरवी
तिमहोदेवोमर्त्याँऽआविवेश ॥३॥ त्रिधाहितम्पणिभिर्गुह्यमानङ्ग
विदेवासो घृतमन्वविन्दन् ॥ इन्द्रंऽएक ँ सूर्य्यऽएकञ्जजानव्वे
नादेक ँ स्वधयानिष्टतक्षुः ॥ ४ ॥ एताऽअर्षन्तिहृद्यात्समुद्रा
च्छतव्व्रजारिपुणानावचक्षे ॥ घृतस्यधाराऽअभिचाकशीमिहिरण्य

योऽब्वेतसोमध्यंऽआसाम ॥ ५ ॥ सम्म्यक्स्त्रंवन्तिसरितोनधेनांऽअन्त
र्हृदामनंसापूयमांनाः ॥ एतेऽअर्षन्त्यूर्म्मयोघृतस्यमृगाऽइवक्षिपणो
रीषमाणाः ॥ ६ ॥ सिन्धोरिवप्प्राध्द्वनेशूघनासोव्वातंप्प्रमियः पत
यन्तियह्वाः ॥ घृतस्यधारांऽअरुषोनव्वाजीकाष्ठांभिन्दन्नूर्म्मिभिः
पिन्वंमानः ॥ ७ ॥ अभिप्प्रंवन्तसमंनेवयोषाः कल्ल्याण्ण्यः

स्म्मयमानासोऽअग्निनम् ॥ घृतस्यधाराः समिधौनसन्त ताजुषाणो
हर्य्यतिजातवेदाः ॥ ८ ॥ कन्याऽइवव्वहतुमेतवाऽउंऽअञ्ज्य
ञ्जानाऽअभिचाकशीमि ॥ यत्रसोमः सूयते यत्रयज्ञोघृतस्य
धाराऽअभितत्पवन्ते ॥ ९ ॥ अभ्यर्षतसुष्टुतिङ्गव्यमाजिमस्म्मासु
भद्राद्रविणानिधत्त ॥ इमंयज्ञन्नयतदेवतानोघृतस्यधारामधुमत्प

वन्ते ॥ १० ॥ धामन्तेव्विश्श्वम्भुवनमधिश्श्रितमन्तः समुद्द्रे हृद्द्यन्तरायुषि ॥ अपामनीके समिथे यऽआभृतस्तमश्यामममधुमन्तन्तऽऊर्म्मिम् ॥ ११ ॥ पुनस्त्वादित्त्यारुद्द्राव्वसवः समिन्धताम्पुनर्ब्रह्माणोव्वसुनीथयज्ञैः ॥ घृतेनत्त्वन्तन्न्वंव्वर्द्धयस्वसत्याः सन्तुयजमानस्यकामाः ॥ १२ ॥ सप्ततेऽअग्ग्नेसमिधः सप्तजिह्वाः सप्तऽऋषयः सप्तधामप्प्रियाणि ॥ सप्तहोत्राः सप्तधात्वायजान्तिसप्त

योनीरापृणास्वघृतेनस्वाहा ॥१३॥ मूर्द्धानन्दिवोऽअरतिम्पृथिव्या वैश्वानरमृतऽआजातमग्निम्म॥ कविᳫँसम्म्राजमतिथिञ्जनानामा सन्नापात्रञ्जनयन्तदेवाः ॥१४॥पूर्ण्णादर्व्विपरापत सुपूर्ण्णापुनरापत॥ वस्नेवविक्रीणावहाऽइषमूर्ज्जᳫँ शतक्रतो-स्वाहा ॥ १५ ॥

इदमग्नये वैश्वानराय वसुरुद्रादित्येभ्यः शतक्रतवे सप्तवते अग्नये अद्भ्यश्च न मम ॥ ततो वसोर्द्धारां जुहुयात ॥ तत्र मन्त्राः—

ॐ सप्ततेऽअग्नेसमिधः स० ॥ १ ॥ शुक्रज्योतिश्चचित्रज्योति
श्चसत्यज्ज्योतिश्चज्योतिष्मांश्च ॥ शुक्रश्चऽऋतपाश्चात्यंहाः
॥२॥ ईदृङ्चान्न्यादृङ्चसदृङ्चप्प्रतिसदृङ्च ॥ मितश्चसम्मितश्चस
भराः ॥ ३ ॥ ऋतश्चसत्यश्चध्रुवश्चधरुणश्च ॥ धर्त्ताचविधु
र्त्ताचविधारयः ॥ ४ ॥ ऋतजिच्चसत्यजिच्चसेनजिच्चसुषेणश्च ॥

अन्तिमित्रश्चदूरेऽअमित्रश्चगणः ॥ ५ ॥ ईदृक्षासऽएतादृक्षासऽ
ऊषणंःसदृक्षासःप्रतिसदृक्षासऽएतन ॥ मितासश्च सम्मितासोनो
ऽअद्यसभरसोमरुतोयज्ञेऽअस्मिन् ॥ ६ ॥ स्वतवाँश्च प्रघासीचं
सान्तपनश्चगृहमेधीचं ॥ क्रीडीचंशाकीचोज्जेषी ॥ ७ ॥ इन्द्र
न्दैवीर्व्विशोमरुतो नुवर्त्मानोभवन्न्यथेन्द्रन्दैवीर्बिशोमरुतोनुव
र्त्मानोभवन् ॥ एवमिमंयजमानन्दैवीश्चव्विशोमानुषीश्चानुवर्त्मा

नोभवन्तु ॥ ८ ॥ इम ᳵ स्तनमूर्ज्जस्वन्तन्धयापाम्प्रपीनम ग्ग्ने
सरिरस्यमद्ध्ये ॥ उत्संञ्जुषस्वमधुमन्तमर्व्वन्त्समुद्रिय ᳫ सद
नमाविंशस्व ॥ ९ ॥ घृताम्मिमिक्षेघृतमंस्ययोनिर्घृतेश्रितोघृतम्म्वस्य
धाम ॥ अनुष्ष्वधमावहमादयस्व स्वाहाकृतंवृषभवक्षि हव्यम् ॥ १० ॥
व्वसोः पवित्रमसिशतधारंव्वसोः पवित्रमसिसहस्रधारम् ॥ देवस्त्वा
सविता पुनातु व्वसोः पवित्रेणशतधारेणसुप्वा काम्मधुक्षः स्वाहा ॥ ११ ॥

ततोऽग्निं प्रदक्षिणीकृत्य पश्चिमदेशे प्राङ्मुखोपविश्य ततः स्रुवेण भस्म आनीय त्र्यायुषं कुर्यात् ॥

ॐ त्र्यायुषंजमदग्नेः, इति ललाटे । कश्यपस्यत्र्यायुषम्, इति ग्रीवायाम् । यद्देवेषु त्र्यायुषम्, इति दक्षिणांशे । तन्नोऽअस्तुत्र्यायुषम्, इति हृदि ॥

संस्रवप्राशनम् । आचमनम् । पवित्राभ्यां मार्जनम् । अग्नौ पवित्रप्रतिपत्तिः ॥ ब्रह्मणे पूर्णपात्रदानम् ॥ तत्र सङ्कल्पः— कृतस्य ग्रहशान्तिहोमकर्मणोऽङ्गतया विहितमिदं पूर्णपात्रं सदक्षिणं ब्रह्मणे तुभ्यमहं सम्प्रददे ॥ ॐ द्यौस्त्वा ददातु पृथिवी त्वा प्रतिगृह्णातु ॥ अग्नेः पश्चात्प्रणीताविमोकः ॥"ॐ आपः शिवाः शिवतमाः शान्ताः शान्ततमास्तास्ते कृण्वन्तु भेषजम्"इति उपयमनकुशैर्मार्जयेत् ॥ उपयमनकुशानामग्नौ प्रक्षेपः ॥ ब्रह्मग्रन्थिविमोकः ॥ ततः श्रेयः सम्पाद्य दानम् ॥ अद्येत्यादिकृतस्य ग्रहशान्त्याख्यस्य कर्मणो यजमानाय श्रेयोदानं करिष्ये ॥ तत्रादौ

वचः प्रतिवचनम् ॥ शिवा आपः सन्तु । सन्तु शिवा आपः ॥ सौमनस्यमस्तु । अस्तु सौमनस्यम् ॥ अक्षतं चारिष्टं चास्तु । अस्त्वक्षतमरिष्टञ्च ॥ यजमानहस्ते गन्धादिदानम् ॥ गन्धाः पान्तु । सुमङ्गल्यं चास्तु । अक्षताः पान्तु । आयुष्यमस्तु ॥ पुष्पाणि पान्तु । सौश्रियमस्तु ॥ यत्पापं रोगमशुभमकल्याणं च तद्दूरे प्रतिहतमस्तु । यच्छ्रेयस्तदस्तु । भवन्नियोगेन मया अस्मिन् ग्रहशान्त्याख्ये कर्मणि यत्कृतं आचार्यत्वं तदुत्पन्नं श्रेयः तत् अमुना साक्षतेन सजलेन पूगीफलेन तुभ्यमहं सम्प्रददे ॥ प्रतिगृह्यताम् ॥ देवस्यत्वेति प्रतिगृह्णामि ॥ तेन श्रेयसा त्वं श्रेयोवान्भव ॥ यजमानो भवामीति तेन वाच्यम् ॥ एवमेव ब्रह्मादयो ऋत्विजो जापकादयश्च ॥ यद्वा ॥ ब्रह्मादयो ऋत्विजो जापकाश्च आचार्यद्वारा श्रेयोदानं कुर्युः ॥ तद्यथा--भवन्नियोगेन मया अस्मिन् ग्रहशान्त्याख्ये कर्मणि यत्कृतं आचार्यत्वं तथा एभिर्ब्राह्मणैः सह यत्कृतं ब्रह्मत्वं गाणपत्यत्वं सादस्यत्वं तथा च यः कृतो जपः आचार्यत्वाद् ब्रह्मत्वाद् गाणपत्यत्वात् सादस्यत्वाज्जापकत्वात् यदुत्पन्नं श्रेयस्तदमुना साक्षतेन सजलेन पूगीफलेन तुभ्यमहं

सम्प्रददे ॥ तेन श्रेयसा त्वं श्रेयोवान्भव ॥ भवामीति तेन वाच्यमिति ॥ ततो आचार्यादीन् गन्धवस्त्रालङ्कारादिभिर्यथाविभवं पूजयेत् ॥ *आचार्यादिभ्यो ब्राह्मणेभ्यो दक्षिणां दद्यात् ॥ तत्रायं क्रमः—आचार्याय गाम् ॥१॥ ब्रह्मणे वृषभम् ॥ २ ॥ सदस्याय अश्वम् ॥ ३ ॥ ऋत्विग्भ्यो सुवर्णं दद्यात् ॥ ४ ॥ कृतस्य ग्रहशान्तिकर्मणः सांगतासिध्यर्थं तत्संपूर्णफलप्राप्त्यर्थं ग्रहाणां प्रीतये च इदं गोनिष्क्रयभूतं द्रव्यं अमुकगोत्राय अमुकशर्मणे ब्राह्मणाय आचार्याय तुभ्यमहं सम्प्रददे ॥ ॐ स्वस्तीति पठेत् ॥ १ ॥ कृतस्य ग्रहशान्तिकर्मणः० इदं वृषनिष्क्रयभूतं द्रव्यं अमु० ॥ २ ॥ कृतस्य० इदं सदस्याय अश्वनिष्क्रयभू० ॥ ३ ॥ कृ० इदं ऋत्विग्भ्यः सुवर्णनिष्क्रयभू० ॥४॥

* सूर्याय कपिलां धेनुं शङ्खं दद्यात्तथेन्दवे । रक्तं धुरन्धरं दद्याद्भौमाय च ककुद्मिनम् ॥ १ ॥ बुधाय जातरूपन्तु गुरवे पीतवाससी । श्वेताश्वं दैत्यगुरवे कृष्णां गामर्कसूनवे ॥ २ ॥ आयसं राहवे दद्यात्केतुभ्यश्छागमुत्तमम् । सुवर्णेन समं कार्या यजमानेन दक्षिणा ॥ ३ ॥ सर्वेषामथवा गावो दातव्या हेमभूषिताः । सुवर्णमथवा दद्याद् गुर्वा येन तुष्यति ॥ ४ ॥

ततो ब्राह्मणभोजनसङ्कल्पं कुर्यात् ॥ कृतस्य० ग्रहशां० कर्मणः साङ्गुण्यार्थं ग्रहाणां प्रीत्यै च यथासंख्याकान्ब्राह्मणान् यथाकाले यथोत्पन्नेन सिद्धान्नेनाहं भोजयिष्ये ॥ भोजनान्ते तेभ्यस्ताम्बूलदक्षिणां च दास्ये॥ ततो ग्रहपीठदेवतानां गन्धादिपञ्चोपचारैरुत्तरपूजनं कुर्यात् ॥ "गणपत्याद्यावाहितदेवताभ्यो नमः" इतिमन्त्रेण॥ आचार्याय प्रधानपीठादिकं दद्यात॥ कृतस्य० प्राप्त्यर्थं इदं प्रधानपीठं ग्रहपीठं मातृकापीठं सोपस्करं दक्षिणासहितं आचार्याय तु० । तथा कर्मान्ते विहिताम् एकां गां दत्वा भूयसीं सङ्कल्पयेत् । कृतस्यास्य ग्रहयागकर्मणः साङ्गफलप्राप्त्यर्थं साद्गुण्यार्थं न्यूनातिरिक्तदोषपरिहारार्थं च इमां भूयसीं दक्षिणां नानानामगोत्रेभ्यो ब्राह्मणेभ्यो विभज्य दास्ये। ॐ तत्सत ।

ततो घृतच्छायादर्शनं कुर्यात् । तद्यथा—आज्यपात्रं घृतपूरितं सद्रव्यं कृत्वा सम्पूज्य च कुशैर्मन्त्रपाठपूर्वकमभिमन्त्रयेत् । तत्र मन्त्राः—ॐ आज्यं परमयज्ञीयमाज्यं तेजोमयो निधिः । आज्यं हि देवदेवानां प्रियमाज्ये स्थितं

जगत् ॥ १ ॥ तदाज्यवीक्षणो भक्त्या कृते मङ्गलमाप्नुयात् । दुःस्वप्नो दुर्निमित्तञ्च विघ्नौघो नश्यति ध्रुवम् ॥ २ ॥ तेजः प्रज्ञा च शौर्य्यं च बलं चापि प्रवर्धते । पुण्यं सप्ताङ्गराज्यं च भवेदन्यदभीप्सितम् ॥ ३ ॥ ज्ञात्वा वाऽज्ञानतो वाऽपि मनोवाक्कायकर्मभिः । कृतं यत्पातकं तन्मे घृतस्पर्शाद्विनश्यतु ॥ ४ ॥ आज्ये चैव मुखं दृष्ट्वा सर्वपापैः प्रमुच्यते । इत्यभिमन्त्र्य सङ्कल्पः—अमुकोऽहं सर्वारिष्टविनाशार्थम् आज्यावेक्षणं करिष्ये ।

ॐ तेजोऽसि शुक्रमस्यमृतमसि धामनामासि प्रियं देवानाम नाधृष्टं देवयजनमसि ॥ १ ॥ ध्रुवासिध्रुवोयं यजमानोस्मिन्नायतने प्रजयापशुभिर्भूयात् । घृतेन द्यावापृथिवी पूर्य्येथामिन्द्रस्य

च्छदिरसि विश्वजनस्य च्छाया ॥ २ ॥

इत्थमवलोकितमाज्यं सङ्कल्पयेत । इदमवलोकितमाज्यं ताम्रादिपात्रस्थितं सद्रव्यं मृत्युञ्जयदैवतं मृत्युञ्जयप्रीतये सर्वारिष्टनिरासार्थं च ब्राह्मणाय तुभ्यमहं सम्प्रददे ॐ तत्सन्न मम इति दत्त्वा 'त्र्यम्बकम्—' इति मन्त्रं पठेत । ततो रुद्रकलशदेवतान्तरकलशोदकमेकस्मिन्पात्रे कृत्वा दूर्वापञ्चपल्लवैरुदङ्मुख आचार्यस्तिष्ठन् चत्वारो ऋत्विजश्च सकुटुम्बं स्वरुत्तरतः सपत्नीकं यजमानं प्राङ्मुखमुपविष्टमभिषिञ्चेयुः ॥ तत्राभिषेकमन्त्राः—

देवस्य त्वा० ॥ सरस्वत्यै वाचो यन्तुर्यन्त्रियै दधामि बृहस्पतेष्ट्वा साम्राज्येनाभिषिञ्चाम्यसौ ॥ १ ॥ देवस्य त्वा० ॥ सरस्वत्यै वाचो यन्तुर्य

न्तो ब्रुवन्तु ॥ अस्तु परिपूर्णा इति ब्राह्मणाः ॥ अथ क्षमाप्रार्थना ॥ जपच्छिद्रं तपश्छिद्रं यच्छिद्रं शान्तिकर्मणि । सर्वं भवतु मेऽच्छिद्रं ब्राह्मणानां प्रसादतः ॥ १ ॥ प्रमादात्कुर्वतां कर्म प्रच्यवेताध्वरेषु यत् ॥ स्मरणादेव तद्विष्णोः संपूर्णं स्यादिति श्रुतिः ॥२॥ यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु । न्यूनं सम्पूर्णतां याति सद्यो वन्दे तमच्युतम् ॥३॥ ॐ विष्णवे नमः ॥ (ततो तिलकाशीर्वादौ) श्रीर्वर्चस्वमायुष्यमारोग्यमाविद्धात्पवमानं महीयते । धान्यं धनं पशुं बहुपुत्रलाभं शतसंवत्सरं दीर्घमायुः ॥ १ ॥ मन्त्रार्थाः सफलाः सन्तु पूर्णाः सन्तु मनोरथाः । शत्रूणां बुद्धिनाशोऽस्तु मित्राणामुदयस्तव ॥ २ ॥ यज्ञान्ते ब्राह्मणान्भोजयित्वा दीनानाथांश्चान्नादिना संतोष्य स्वयं सुहृन्मित्रादियुतः सोत्साहं सन्तुष्टो हविष्यं भुञ्जीतेति शिवम् ॥

सनाढ्यवंशोद्भवभूमिदेवो ह्यासीज्जगन्नाथ इति प्रसिद्धः । बभूवुरात्मप्रभवा हि तस्य चत्वार ईड्यैश्च गुणैः प्रजुष्टाः ॥ १ ॥
तन्मध्यगौ योग्यतमावभूतां गोविन्दनामाऽथ च माधवाख्यः । तत्रादिमः श्लाघ्यगुणो महात्मा चाकाण्ड एवात्मतनुं मुमोच ॥ २ ॥
तस्यानुजोऽयं खलु काशिनाथपाठालयेऽध्यापनमाविर्तन्वन् । श्रीमाधवाख्यो वसतीह काश्यामाद्यन्तजाभ्यां सह सोदराभ्याम् ॥ ३ ॥
तेनैव लोकेरितमानसेन समन्त्रकः खेटमखप्रयोगः । सटिप्पणश्चापि मुदे बुधानां सम्पादितः शोध्य सुवर्धितश्च ॥ ४ ॥
श्रीविक्रमादित्यधराधिपस्य नागभनन्देन्दुमिते सुवर्षे । मास्याश्विने शुक्लदले दशम्यां कुजे समाप्तिं ह्यगमत्किलेषः ॥ ५ ॥

बाबू काशीप्रसाद भार्गव द्वारा, भार्गवभूषण प्रेस, त्रिलोचन बनारस में मुद्रित ।

च्छदिरसिविश्वजनस्यच्छाया ॥ २ ॥

इत्थमवलोकितमाज्यं सङ्कल्पयेत । इदमवलोकितमाज्यं ताम्रादिपात्रस्थितं सद्रव्यं मृत्युञ्जयदैवतं मृत्युञ्जयप्रीतये सर्वारिष्टनिरासार्थं च ब्राह्मणाय तुभ्यमहं सम्प्रददे ॐ तत्सन्न मम इति दत्त्वा 'त्र्यम्बकम्—' इति मन्त्रं पठेत । ततो रुद्रकलशदेवतान्तरकलशोदकमेकस्मिन्पात्रे कृत्वा दूर्वापञ्चपल्लवैरुदङ्मुख आचार्यस्तिष्ठन् चत्वारो ऋत्विजश्च सकुटुम्बं स्वस्युत्तरतः सपत्नीकं यजमानं प्राङ्मुखमुपविष्टमभिषिञ्चेयुः ॥ तत्राभिषेकमन्त्राः—

देवस्यत्वा० ॥ सरस्वत्यैव्वाचोयन्तुर्यन्त्रियैदधामिबृहस्पतेष्ट्वासाम्म्रा ज्ज्येनाभिषिञ्चाम्म्यसौ ॥ १ ॥ देवस्यत्वा० ॥ सरस्वत्यैव्वाचोयन्तुर्य

न्त्रेणाग्ग्नेः साम्म्राज्ज्येनाभिषिञ्चामि ॥२॥ देवस्यत्वा ॥ अश्विनो र्भैषज्ज्येनतेजसेब्रह्मवर्च्चसायाभिषिञ्चामिसरस्वत्यै भैषज्ज्येनव्वी र्य्यायान्नाद्यायाभिषिञ्चामीन्द्रस्येन्द्रियेणबलायश्रियैयशसेऽभि षिञ्चामि ॥ ३ ॥

ॐ सुरास्त्वामभिषिञ्चन्तु ब्रह्मविष्णुमहेश्वराः। वासुदेवो जगन्नाथस्तथा सङ्कर्षणो विभुः॥ १ ॥ प्रद्युम्नश्चानिरुद्धश्च भवन्तु विजयाय ते। आखण्डलोऽग्निर्भगवान् यमो वै निरृतिस्तथा ॥ २ ॥ वरुणः पवनश्चैव धनाध्यक्षस्तथा शिवः। ब्रह्मणा सहिताः सर्वे दिक्पालाः पान्तु ते सदा ॥ ३ ॥ कीर्तिर्लक्ष्मीर्धृतिर्मेधा पुष्टिः श्रद्धा क्रिया

मतिः । बुद्धिर्लज्जा वपुः शान्तिः कान्तिस्तुष्टिश्च मातरः ॥ ४ ॥ एतास्त्वामभिषिञ्चन्तु देवपत्न्यः समागताः । आदित्यश्चन्द्रमा भौमो बुधजीवसिताकंजाः ॥ ५ ॥ ग्रहास्त्वामभिषिञ्चन्तु राहुः केतुश्च तर्पिताः । देवदानवगन्धर्वा यक्षराक्षसपन्नगाः ॥ ६ ॥ ऋषयो मनवो गावो देवमातर एव च । देवपत्न्यो द्रुमा नागा दैत्याश्चाप्सरसाङ्गणाः ॥ ७ ॥ अस्त्राणि सर्वशस्त्राणि राजानो वाहनानि च । औषधानि च रत्नानि कालस्यावयवाश्च ये ॥ ८ ॥ सरितः सागराः शैलास्तीर्थानि जलदानदाः । एते त्वामभिषिञ्चन्तु धर्मकामार्थसिद्धये ॥ ९ ॥ अमृताभिषेकोऽस्तु ॥ शान्तिः पुष्टिस्तुष्टिश्चास्तु ॥

अथावाहितदेवतानां विसर्जनम् । तत्र मन्त्राः—

ॐ उत्तिष्ठब्ब्रह्मणस्प्पतेदेवयन्तंस्त्वेमहे ॥ उपप्प्रयन्तुमरुतः सुदानवऽइन्द्रप्प्राशूर्ब्भवासचा ॥ १ ॥

यान्तु देवगणाः सर्वे पूजामादाय मामकीम् ॥ इष्टकामार्थसिध्यर्थं पुनरागमनाय च ॥ १ ॥ आवाहितदेवताः स्वस्थाने गच्छत ।

ॐ यज्ञयज्ञङ्गच्छयज्ञपतिङ्गच्छस्वांयोनिङ्गच्छस्वाहा ॥ एषतेयज्ञोयज्ञपतेसहसूक्तवाकः सर्ववीरस्तञ्जुषस्वस्वाहा ॥ २ ॥

गच्छ गच्छ सुरश्रेष्ठ स्वस्थाने परमेश्वर ॥ यत्र ब्रह्मादयो देवास्तत्र गच्छ हुताशन ॥ २ ॥ यज्ञनारायण स्वस्थाने गच्छ ॥ ॐ चतुर्भिश्च चतुर्भिश्च द्वाभ्यां पञ्चभिरेव च । हूयते च पुनर्द्वाभ्यां तस्मै यज्ञात्मने नमः ॥ ३ ॥ मया यत्कृत यथाकालं यथादेशं यथाज्ञानं यथाशक्ति ग्रहयज्ञाख्य (अमुकाख्यं वा) कर्म तेन श्रीपापापहा महाविष्णुः प्रीयताम् ॥ ॐ तत्सद्ब्रह्मार्पणमस्तु ॥ सकुशजलं भूमौ क्षिपेत् करौ संपुटीकृत्य ॥ मया यत्कृतं ग्रहयज्ञाख्यं कर्म तत्कालहीनं भक्तिहीनं शक्तिहीनं श्रद्धाहीनं भवतां ब्राह्मणानां वचनात् श्रीसूर्याद्यावाहितदेवताप्रसादात्सर्वं विधेः परिपूर्णमस्त्विति भव-

न्तो ब्रुवन्तु ॥ अस्तु परिपूर्णं इति ब्राह्मणाः ॥ अथ क्षमाप्रार्थना ॥ जपच्छिद्रं तपश्छिद्रं यच्छिद्रं शान्तिकर्मणि । सर्वं भवतु मेऽच्छिद्रं ब्राह्मणानां प्रसादतः ॥ १ ॥ प्रमादात्कुर्वतां कर्म प्रच्यवेताध्वरेषु यत् ॥ स्मरणादेव तद्विष्णोः संपूर्णंस्यादिति श्रुतिः ॥२॥ यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु । न्यूनं सम्पूर्णतां याति सद्यो वन्दे तमच्युतम् ॥३॥ ॐ विष्णवेनमः ॥ (ततो तिलकाशीर्वादौ) श्रीर्वर्चस्त्रमायुष्यमारोग्यमाविदधात्पवमानं महीयते । धान्यं धनं पशुं बहुपुत्रलाभं शतसंवत्सरं दीर्घमायुः ॥१॥ मन्त्रार्थाः सफलाः सन्तु पूर्णाः सन्तु मनोरथाः । शत्रूणां बुद्धिनाशोऽस्तु मित्राणामुदयस्तव ॥२॥ यज्ञान्ते ब्राह्मणान्भोजयित्वा दीनानाथांश्चान्नादिना संतोष्य स्वयं सुहृन्मित्रादियुतः सोत्साहं सन्तुष्टो हविष्यं भुञ्जीतेति शिवम् ॥

सनाढ्यवंशोद्भवभूमिदेवो ह्यासीज्जगन्नाथ इति प्रसिद्धः । बभूवुरात्मप्रभवा हि तस्य चत्वार ईड्यैश्च गुणैः प्रजुष्टाः ॥ १ ॥
तन्मध्यगौ योग्यतमावभूतां गोविन्दनामाऽथ च माधवाख्यः । तत्रादिमः श्लाघ्यगुणो महात्मा चाकाण्ड एवात्मतनुं मुमोच ॥ २ ॥
तस्यानुजोऽयं खलु काशिनाथपाठालयेऽध्यापनमावितन्वन् । श्रीमाधवाख्यो वसतीह काश्यामाद्यन्तजाभ्यां सह सोदराभ्याम् ॥ ३ ॥
तेनैव लोकेरितमानसेन समन्त्रकः खेटमखप्रयोगः । सटिप्पणश्चापि मुदे बुधानां सम्पादितः शोध्य सुवर्धितश्च ॥ ४ ॥
श्रीविक्रमादित्यधराधिपस्य नागभनन्देन्दुमिते सुवर्षे । मास्याश्विने शुक्लदले दशम्यां कुजे समाप्तिं ह्यगमत्किलेषः ॥ ५ ॥

बाबू काशीप्रसाद भार्गव द्वारा, भार्गवभूषण प्रेस, त्रिलोचन बनारस में मुद्रित ।

पुस्तक मिलने का पता—

भार्गव पुस्तकालय, गायघाट, बनारस सिटी।